# आरण्यकम्

## संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्


वर्षम् – अष्टमम् अङ्कः – द्वितीयः

आश्विनः, वि० सं० २०५८

सितम्बर, २००१

प्रतिवर्षं प्रकाशनकालः

चैत्रः, आश्विनः-विक्रमाब्दः

मार्च, सितम्बर

प्रत्यङ्कम् - १५ रूप्यकाणि वार्षिकं शुल्कं ३० रूप्यकाणि

## परामर्शदात्री समितिः

पण्डित वासुदेव द्विवेदी, वाराणसी
डॉ० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा
डॉ० हरिहर झा, दरभङ्गा
डॉ० उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ० राय अश्विनी कुमारः, बोधगया

*प्रधानसम्पादकः*
पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

*सम्पादकः*
डॉ० गोपबन्धु मिश्रः



*प्रकाशिका*
संस्कृतप्रसारपरिषद्
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः डॉ० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गोला मुहल्ला, आरा, बिहार-802301 इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च ।

डॉ० गोपबन्धु मिश्रः
सम्पादकः


# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| सम्पादकीयम् | | |
| 1. विवाहसंस्कारस्योपयोगिता | सीमा रानी<br>शोधच्छात्रा (संस्कृतम्)<br>वीर कुँवर सिंह विश्वविद्यालयः<br>आरा | १ |
| 2. संस्कृतप्रसारपरिषद्, आरा संक्षिप्तम् इतिवृत्तम् | | ६ |
| 3. शास्त्रेषु 'विवाहः' सम्बन्धविच्छेदश्च | सुनील कुमार प्रधानः<br>शोधच्छात्रः (संस्कृतम्)<br>वीर कुँवर सिंह विश्वविद्यालयः<br>आरा | ७ |
| 4. श्रीवैष्णवपरम्परायाः पञ्चायुधस्तोत्रं महाकविभासस्य पञ्चायुधवर्णनं च | डॉ० राजकिशोर मिश्रः<br>डी० ए० वी० विद्यालयः<br>स्वांग (बोकारो) | १३ |
| 5. काव्यरचनायामनुपरीक्षातत्त्वम् | डॉ० मृदुला राय<br>उपाचार्या, संस्कृतविभागः<br>विश्वभारती, शान्तिनिकेतनम् | १७ |
| 6. कालिदासस्यार्थिकविचारः ('मागधम्' इत्यतः साभारम्) | स्व० डॉ० परमहंस रायः<br>प्राचार्यचरः, एच. डी. जैन कालेज<br>आरा | २३ |

| | | | |
|---|---|---|---|
| 7. | कालिदासस्य जीवनदर्शनम् ('मागधम्' इत्यतः साभारम्) | स्व० डा० नेमीचन्द्र शास्त्री संस्कृतप्राकृतविभागाध्यक्षचरः एच. डी. जैन कालेज, आरा | ३७ |
| 8. | किंचित् पारिभाषिकम् (अष्टाध्यायीगतशब्दानां काशिकाकृतपरिभाषाभिः सह संग्रहः) | | ४८ |
| 9. | कमलेशविलासः (पुस्तकसमीक्षा) | रचयिता-स्व० श्री कमलेश मिश्रः समीक्षकः - सुनील कुमार प्रधानः | ४६ |


❖

# सम्पादकीयम्

जीवनदर्शनम्, जीवनं जीवनशुद्धिश्च इत्येतानि त्रीणि मानवजीवनस्य वैशिष्ट्यं प्रतिपादयन्ति। तत्र जीवनदर्शनम् आधारः, जीवनम् आधेयम्, जीवनशुद्धिश्च लक्ष्यमिति कथयितुं शक्यते। प्रत्येकम् आदर्शमानवस्य जीवने एतेषु त्रिषु निरन्तरं सामञ्जस्यम् अभिलक्ष्यते। जीवनस्य गतिः स्थितिर्वा धरापृष्ठे भवति, परन्तु तस्य दर्शनं धरायाः गर्भे आधाररूपेण तिष्ठति चेत् सा स्थितिः स्पष्टा अचञ्चला च भवति। अतएव, कस्यचित् जीवनं निरन्तरतया समीक्ष्य तस्य जीवनविषयिणी दृष्टिः अस्माभिः ज्ञायते विविच्यते च। यादृशी दृष्टिः तादृशं जीवनम् इत्येष हेतुहेतुमद्भावो बहुधा प्रमाणीक्रियमाणोऽस्ति। अतः जीवने उत्तमानां भौतिकसाधनानां वैशिष्ट्यं न, अपितु उत्तमस्य जीवनदर्शनस्यैव महत्त्वं समधिकं सिद्ध्यति। किमुत्तमं किं चानुत्तमं दर्शनम् इत्येतस्यां विचिकित्सायाम् 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत', 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः', 'महाजनो येन गतः स पन्थाः' इत्यादीनि वचनान्यनुसृत्य महापुरुषाणां जीवनं जीवनदर्शनं च श्रेयस्करं मन्येत। एतदर्थं तादृशानां श्रेष्ठानां जीवनचर्या जीवनविषयकं तेषां चिन्तनं च भूयो भूयः समीक्षणीयमस्ति। तद्यथा–जीवने आवश्यकतानुसारं द्रव्यग्रहणं ततोऽधिकस्य च परित्यागः समाजकल्याणाय करणीय इति रघुकौत्साख्यानद्वारा महाकवेः कालिदासस्य जीवनदर्शनम् अस्माभिः समीक्षितुं शक्यते। एवमेव अनुपभुक्तम् असञ्चारितं च धनं मृतं भवति, व्यापारे नियुक्तं सञ्चरणशीलं वा धनमेव उपयोगि भवति इति यदाधुनिकाः अर्थशास्त्रिणो वदन्ति तादृशं प्रमाणं कालिदासस्य काव्येषु ऊहितुं शक्यते।

उत्तमं जीवनदर्शनमाश्रित्य जीवनमेव मनुष्यस्य लक्ष्यं न, अपितु एतस्मिन्नेव जीवने अधिकाधिकं परिशोधनं संस्कारं वा आनीय अपरस्य कृते आदर्शस्थापनं तस्य लक्ष्यं भवति। तद्यथा–याथातथ्येन शारीरिकसम्पर्कद्वारा सन्तानोत्पत्तिक्षमतायां सत्यामपि विवाहाख्यसंस्कारमुखेन सृष्टिनियमसंरक्षणं न केवलम् औपचारिकः कार्यविशेषः, अपितु शुद्धनियन्त्रित-जीवनस्य एकम् अनुकरणीयं स्वरूपं विद्यते। मृत्युः ध्रुव इति ज्ञात्वा राष्ट्रहिताय

परोपकाराय वा दधीचिवत् देहत्यागः सर्वेषां कृतेऽनुकरणीयो भवति । एकस्य सत्यवचनस्य रक्षायै श्रीरामद्वारा चतुर्दशवर्षावधिकस्य वनवासस्य स्वीकरणं मानवस्य महामानवपदवीम् अधिरोढुं क्षमतां साधयति । अर्थात्, एतस्मिन् मानवशरीरे एव मानवोत्तरगुणानां विकासद्वारा असाध्यम् अनुकरणीयं किंचित् साधनीयमिति एतादृशो यत्नः करणीयोऽस्ति । अतएव काव्यशास्त्रे उत्तमं काव्यं ('इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्यात्') किम्, व्यवहारशास्त्रे महाजनो विशिष्टो वा जनः ('मानो हि महतां धनम्', 'समबुद्धिर्विशिष्यते' इत्यादि) कः इत्येतादृशानि उत्तमोत्तमलक्षणानि भूरिशः प्रवर्तन्ते । यद्यपि प्रत्येकस्मिन् क्षेत्रे उत्तमता दुर्लभाऽस्ति, तथापि तस्य लक्षणकथनं स्व-स्वक्षेत्रसम्बद्धेषु शास्त्रेषु प्रवर्तते एव । अर्थात्, केवलं मानवरूपेण जीवनम् अथवा काव्यमात्रं रचनीयम् इत्यत्र न सन्तुष्येत, अपितु स्व-स्वक्षेत्रे उत्तमतामधिगन्तुं योग्यताविस्तारोऽवश्यं करणीयः इति भावः सर्वत्र दृश्यते । 'नाल्पे सुखमस्ति, भूमैव सुखम्', 'चरैवेति' इत्यादीनि वचनानि जीवने परिशोधनाय संस्काराय वा निरन्तरं प्रयतितुं जनान् प्रेरयन्ति । अतएव नानाविधैः कारणैः शिक्षा-गणचेतना-भावविनिमय-धनार्जनादिषु प्रसङ्गेषु जायमानं मूल्यापकर्षं वीक्ष्याऽपि मनुष्यः जीवनदर्शनस्य मूल्यं जीवनशुद्धिरूपं लक्ष्यं च न जहाति । मूल्यापकर्षस्य पुरतः मूल्यस्य पराजयं स नैव स्वीकरोति । असत्यस्य कादाचित्कं विजयं दृष्ट्वा 'सत्यमेव जयते' इति मूलं वाक्यं स नैव विस्मरति ।

'आरण्यकम्' इदं विविधैरुपायैः उक्तमुत्तमं मूल्यबोधं जनयितुं यतमानमस्ति । अङ्केऽस्मिन् आरातः पूर्वप्रकाशितात् 'मागधम्' इत्याख्यशोधपत्रात् लेखद्वयं साभारं स्वीकृतमस्ति । 'किंचित् पारिभाषिकम्' इति शीर्षकेणैको नवीनः स्तम्भः स्थानं लभमानोऽस्ति । सर्वत्र विदुषां विमर्श एव प्रमाणम् ।

सितम्बर २००१

*विद्वदवनतः*
**गोपबन्धु मिश्रः**
सम्पादकः

# विवाहसंस्कारस्योपयोगिता

सीमा रानी

मनुष्यस्य आध्यात्मिक–सांस्कृतिकजीवने संस्काराणाम् महत्त्वपूर्णं स्थानमस्ति । संस्काराः मनुष्यस्य जीवनम् उन्नतं, परिष्कृतं, सुसंस्कृतं च कुर्वन्ति। आन्तरिकी बाह्या च शुद्धता, नैतिकताध्यात्मिकतयोः आरोपणं तथा च जीवनस्य पवित्रता संस्कारैः भवन्ति । असंस्कृत–स्वरूपस्य सुसंस्काराय अनुशासनाय च संस्काराणां नियोजनं कृतमस्ति। संस्काराणां लक्ष्याणि सन्ति–लौकिकसमृद्धेः कामना, विघ्नात् रक्षा, वाञ्छितवस्तूनां प्राप्तिः, मानवस्य सामाजिकीकरणं, नैतिकतायाः संवर्द्धनं, व्यक्तित्वस्योत्कर्षः, आध्यात्मिकश्च विकासः ।

विभिन्नेषु संस्कारेषु विवाहसंस्कारः सर्वाधिकं महत्त्वपूर्णः गौरवशाली च मन्यते । हिन्दूजीवने विवाहसंस्कारः एका संविदा न वर्तते अपितु संस्कारवत् पूजितः वर्तते, अस्य उद्देशः विभिन्नानां पुरुषार्थानां पूर्णता वर्तते येषां सम्पादने पति–पत्न्योः उभयोः भूमिका भवति । परिवारस्य, वंशस्य चोन्नयनमपि अनेन माध्यमेनैव भवति । अयं जीवनस्य एतादृशं धार्मिकबन्धनमस्ति यस्य उल्लङ्घनं धर्मशास्त्रीय–नैतिकनियमानां तथा च सामाजिकमूल्यानां विरुद्धमस्ति ।

शतपथब्राह्मणस्यानुसारेण–पत्नी पत्युः अर्धाङ्गिनी भवति, अतः यावत् पुरुषः विवाहसंस्कारं पुरस्कृत्य पत्न्याः वरणं न करोति, तावत् सः अपूर्णः मन्यते । तस्यामपूर्णावस्थायां तेन सम्पादितानां धार्मिककृत्यानां फलं तस्मै प्राप्तं न भवति–**"अयज्ञिय एष वा योऽपत्नीकः ।"**

'विवाह' शब्दः 'वि' उपसर्गपूर्वकात् वह्–धातोः घञ्प्रत्ययेन निष्पादितः भवति । अस्य शाब्दिकः अर्थः भवति–'प्रापणम्' । अर्थात् पत्युः गृहे पत्न्याः प्रापणम् अथवा पूर्णतां प्रति स्वजीवनस्य संवहनम्। विवाहं परिभाषमाणः वेस्टरमार्कः कथयति–

**"विवाहः स्त्रीपुरुषयोः एकम् एतादृशं सम्मेलनमस्ति येन कञ्चिदपि संस्कारं सम्पादयितुं ताभ्याम् अनुमतिः दीयते।"**

**विवाहसंस्कारस्योद्देश्यानि सन्ति–**

1. वंशवृद्धिः,
2. पितृणात् मुक्तये संतानोत्पत्तिः,
3. यज्ञादिकानां धार्मिकानुष्ठानां योग्यता,
4. सामाजिकानां धार्मिकाणां च कर्त्तव्यानां निर्वाहः,
5. धर्मानुकूलस्य 'कामस्य' पूर्तिः ,

कौटिल्यस्यानुसारेण धर्मार्थयोः च विरोधिनः कामस्य सेवनं न कुर्यात् –

**"धर्मार्थविरोधेन कामं न सेवेत ।"**

6. सुखदुःखयोः सहभागितायै सहयोगिनः प्राप्तिः ,
7. पुरुषार्थप्राप्तौ सुगमता ।

आचार्यः मनुः विवाहस्य लक्ष्यसम्बन्धे कथयति–

**"अधीत्य विधिवद् वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।**
**दृष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ।।"**

विवाहस्य पूर्णतामादातुं निम्नसंस्काराणां सम्पादनमावश्यकं वर्तते–

(1) कन्यादानम्, (2) पाणिग्रहणम्, (3) लाजाहोमः, (4) सप्तपदी, (5) अश्वारोहणम्, (6) सूर्यावलोकनम्, (7) ध्रुवदर्शनम् ।

विवाहसंस्कारस्यान्तर्गते त्रिंशतां प्रमुखानुष्ठानानां वर्णनं वर्तते।

समाजस्य सम्भ्रान्तजनानां, गुरुजनानां कुटुम्बसम्बन्धिना–मुपस्थितिः एतेषामनुष्ठानानामवसरे आवश्यकी वर्तते, यतो हि वरकन्ययोः उभयोः यदि कश्चिदपि एतत् कर्त्तव्यबन्धनमुपेक्षिष्यते तर्हि जनाः तं रोत्स्यन्ति, निन्दिष्यन्ति । दम्पती एतेषां वरिष्ठसंभ्रान्तजनानां पुरतः स्वस्य निश्चयस्य, प्रतिज्ञाबन्धनस्य घोषणां कुरुतः । एषः प्रतिज्ञासमारोहः एव विवाहसंस्कारः वर्तते । अस्मिन् उभयोः मनसि सेवायाः, सहायतायाः, उदारतायाः, सहिष्णुतायाः भावः प्रधानः भवेत् न तु अहंकारस्य शासनस्य वा भावः । अस्य पुण्यसंस्कारस्यायोजनस्य एतदेव प्रयोजनं वर्तते ।

**हस्तपीतकरणम्**–कन्यादानकर्तारः कन्यायाः हस्तयोः हरिद्रां लेपयन्ति । हरिद्रा मङ्गलसूचिका वर्तते । अद्यप्रभृति इयं कन्या



बालिकारूपेण आसीत् । विवाहसंस्कारस्य पश्चात् इयं गृहस्य उत्तरदायित्वं वक्ष्यति । आगामिदिनेषु तस्याः हस्ताभ्यां नवनिर्माणस्यानेकानि कार्याणि भविष्यन्ति । अतएव तस्याः कोमलहस्तौ अधिकम् उत्तरदायित्वपूर्णौ समर्थौ माङ्गलिकौ च क्रियेते ।

**कन्यादानम्, गुप्तदानम्**–कन्यादानस्य समये अंशदानस्य प्रथा वर्तते । कन्यायाः अभिभावकः गोधूमचूर्णस्य मध्ये गोपायित्वा किञ्चिदपि धनं कन्यादानस्य समये कन्यायै ददाति । यौतुकस्येदमेव स्वरूपं वर्तते । कन्यायाः उत्प्रेषणकाले (विदाई) तस्याः अभिभावकः उपहारस्वरूपेण तस्यै किञ्चिद् धनं ददाति परन्तु तत् धनं गुप्तं भवति । अभिभावकस्य कन्यायाः च मध्ये एषः स्वकीयः उपहारः वर्तते । अपरेषां जनानामस्मिन् सम्बन्धे पृच्छायाः अवगतेश्च आवश्यकता नास्ति । यौतुकस्य प्रदर्शनस्यावश्यकताऽपि नास्ति ।

निर्धनः धनिकः वा स्वशक्त्यनुरूपं यत् किञ्चिदपि ददाति तत् चर्चायाः विषयः न भवेत्, प्रतिस्पर्द्धायाः विषयोऽपि न भवेत् इति अस्याः प्रथायाः इदं रहस्यं वर्तते । अतः कन्यादानेन सह धनदानस्य प्रथा वर्तते परन्तु दूरदर्शिनः ऋषयः जनानां स्वार्थपरतायाः दुष्टतायाः च सम्भावनां विचिन्त्य एतत् विधानमकुर्वन् यत् दत्तं धनं सर्वथा गुप्तं भवेत् ।

कन्यादानस्यार्थः भवति–कन्यायाः उत्तरदायित्वं मातृपक्षात् वरस्योपरि, वरपक्षस्य वा उपरि स्थानान्तरितमिति । अद्यप्रभृति कन्यायाः पितरौ तस्याः भरणपोषणस्य, विकासस्य, सुरक्षायाः, सुखशान्तेः आनन्दोल्लासादीनां च प्रबन्धं कुरुतः स्म, परन्तु विवाहसंस्कारस्य पश्चात् तं प्रबन्धं वरपक्षस्य जनाः करिष्यन्ति । कन्यादानस्य स्वीकरणसमये वरमहोदयः तथा च तस्याभिभावकजनाः एतत् उत्तरदायित्वं ग्रहिष्यन्ति। इतः परं कन्यायाः कुलगोत्रमपि न पितृपरम्परानुसारेण अपितु पतिपरम्परानुसारेण भविष्यति ।

**ग्रन्थिबन्धनम्**–पाणिग्रहणसंस्कारस्य पश्चात् ग्रन्थिबन्धनं भवति । ग्रन्थिबन्धनस्यार्थः भवति–उभयोः वरकन्ययोः मध्ये एकस्याः नवीनायाः संयुक्तायाः सत्तायाः आविर्भावः ।

ग्रन्थिबन्धने धनं, पुष्पं, दूर्वा, हरिद्रा, अक्षतम् एतानि पञ्च वस्तून्यपि बध्यन्ते। ग्रन्थिबन्धने दीयमानस्य धनस्य कारणमस्ति यत्

धनसम्पत्तौ वरकन्ययोः उभयोः सम्मतिः आवश्यकी भविष्यति । दूर्वायाः अर्थोऽस्ति यत् एतादृशी प्रेमभावना भवेत् या कदापि निर्जीवा न भवेत् । दूर्वायाः जीवनतत्त्वं नष्टं न भवति । यदा दूर्वा शुष्का भवति तदा जलसेचनेन सा हरिद्वर्णा भवति । एतादृशी अजस्रप्रेमभावना आत्मीयता चोभयोः मनसि भवेत् ।

हरिद्रायाः **अर्थोऽस्ति–आरोग्यम्** । पारस्परिकं शारीरिकं मानसिकं स्वास्थ्यं सुविकसितं कर्तुं प्रयत्नः भवेत् । एतादृशः व्यवहारः न भवेत् येन सहयोगिनः स्वास्थ्ये विकारः भवेत्, मानसिकोद्वेगः वा भवेत् ।

अक्षतं विविधसामाजिकोत्तरदायित्वानां स्मरणं कारयति। अस्यार्थोऽस्ति उभयोः जीवनं पुष्पमिव विकसितं प्रफुल्लितं सुगन्धितं च भवेत् । एवं प्रकारेण धनं, दूर्वा, पुष्पं, हरिद्राम् अक्षतञ्च स्थापयित्वा उभयोः ग्रन्थिबन्धनं क्रियते । एतेन आशा क्रियते यत् एतानि सर्वाणि स्वलक्ष्याणि साधयितुं समर्थानि भवन्तु इति–

**ॐ समंजन्तु विश्वेदेवाः समापो हृदयानि नौ ।**
**सं मातरिश्वा संधाता, समुदेष्ट्री दधातु नौ ।।**

ऋ0 10.85.47; पार0 गृ0 सू0 – 1.4.14

**लाजाहोमः**–लाजाहोमसंस्कारे कन्यायाः भ्राता लाजां नीत्वा विवाहसंस्कारस्थलम् (मण्डपम्) आयाति। सः मुष्टिपरिमितां लाजां स्वभगिन्यै ददाति । कन्या तत् वराय ददाति । वरः तत् नीत्वा आहुतिमन्त्रेण सह यज्ञाग्नौ जुहोति । अत्रेदं तात्पर्यमस्ति यत् कन्यायाः वैयक्तिकाय उपयोगाय यत्किञ्चिदपि पितुः गृहात् प्राप्यते तत् सा गोपायित्वा पृथक् न स्थापयति अपितु पत्ये अर्पयति । पार्थक्यस्य, गोपनस्य च भावना पतिपत्नीमध्ये न भवेत् । पतिः श्रमेण विना प्राप्तम् अन्नं स्वपार्श्वे खादितुं न स्थापयति अपितु तत् अन्नं जनकल्याणाय यज्ञाग्नौ अर्पयित्वा वायुमण्डले विकिरति । अस्यां क्रियायां महान् मानवीयादर्शः सन्निहितः वर्तते यत् विना श्रमेण प्राप्तं धनं न स्वीक्रियेत, यदि स्वीक्रियेत तर्हि तत् लोकहिताय वितर्येत ।



**लाजाहोमस्य मन्त्रः–**

**ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव । मम तुभ्यं च संवननं, तदग्निरनुमन्यतामियं स्वाहा ।**
**इदम् अग्नये इदं न मम।।**

पार० गृ० सू० 1.6.2.

**सप्तपदी**–विवाहस्य पश्चात् पतिपत्न्यौ मिलित्वा सप्त कार्यक्रमान् स्वीकुरुतः । तेषु उभयोः द्वयोः उचितं, न्यायसङ्गतं योगदानं भवेत् इत्यस्य रूपरेखा सप्तपद्यां निर्धारिता अस्ति ।

सप्तचरणेषु प्रथमं चरणम् अन्नवृद्धये भवति । अन्नस्योत्पादनं, अन्नस्य रक्षा, अन्नस्य सदुपयोगं यः करोति स एव सफलः गृहस्थः भवति । आहारस्य सात्विकतायाः ध्यानं सर्वदा भवेत् ।

द्वितीयं चरणं शारीरिकस्य मानसिकस्य च बलस्य वृद्धये भवति । व्यायामेन, परिश्रमेण नियमितेन आहारेण विहारेण च शरीरस्य बलं स्थिरं भवति । अध्ययनेन, विचारविमर्शेन मनोबलं वर्द्धते ।

तृतीयं चरणं धनस्य वृद्धये भवति । अपव्ययः न कर्त्तव्यः आयानुसारेण व्ययः भवेत् । धनोपार्जनाय पतिपत्न्योरुभयोः प्रयत्नः भवेत् ।

चतुर्थं चरणं सुखस्य वृद्धये भवति । मनोरञ्जनस्य, विनोदस्य, हासपरिहासस्य च वातावरणे धनाभावेऽपि आनन्दः प्राप्तव्यः। पञ्चमं चरणं परिवारपालनाय अस्ति । परिवारे वरिण्ठैः कनिष्ठैः च जनैः सह समुचितः व्यवहारः भवेत् । षष्ठं चरणम् ऋतुचर्यायाः भवति। सन्तानोत्पादनम् एका स्वाभाविकी वृत्तिः अस्ति । दाम्पत्यजीवने अस्य महत्त्वपूर्णं स्थानं वर्तते ।

सप्तमं चरणं पतिपत्न्योः मध्ये मैत्रीभावस्य स्थैर्याय वर्तते । तयोः जीवने कर्कशतायाः कठोरतायाः आगमनं न भवेत् अपितु सज्जनतायाः, सेवायाः, क्षमायाः, सहृदयतायाः च वातावरणं भवेत् ।

एतेषामादर्शानां सिद्धान्तानां पालनं यदि पतिपत्नीद्वारा भवेत् तर्हि तयोः दाम्पत्यजीवनस्य सफलतायां न कश्चिदपि सन्देहः भविष्यति ।

❋ ❋ ❋

## संस्कृतप्रसारपरिषद्, आरा

### संक्षिप्तम् इतिवृत्तम्

- स्थापनातिथिः 22.2.1987
- निबन्धनसंख्या 424/1994-95
- कार्यालय :- संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (बिहारः) 802301 दूरभाषसंख्या - (06182) 24193
- आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- पञ्जीकरणसंख्या - RNI 58951/94
- संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः-

| | | सम्माननवर्षम् |
|---|---|---|
| 1. | पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. | पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. | पण्डित सीताराम उपाध्यायः | 1989 |
| 4. | पण्डित सभानाथ पाठकः | 1990 |
| 5. | पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. | पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. | पण्डित केदारनाथ शुक्लः | 1993 |
| 8. | पण्डित जनार्दन मिश्रः | 1994 |
| 9. | पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. | पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. | पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. | पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. | पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. | पण्डित डॉ० श्यामानन्द झा | 1999 |
| 15. | पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. | पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. | पण्डित जयानन्द मिश्रः | 2001 |

- प्रकाशितानि - 12 पुस्तकानि (वितरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम् ।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्गा - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम् । ❖



# शास्त्रेषु 'विवाहः' सम्बन्धविच्छेदश्च

सुनील कुमार प्रधानः

संस्कारेषु विवाहः अन्यतमो विद्यते । वस्तुतः व्यक्तेः गृहस्थाश्रमे प्रवेशः अनेनैव भवति । विवाहं विना मनुष्यः निस्तेजाः भवतीति विष्णुपुराणम्[1]। अयं हि पुरुषार्थस्य मूलं धर्मार्थकाममोक्षाणामाश्रयः गृहस्थजीवनस्य च प्रथमं सोपानमस्ति ।[2] अतएव हिन्दूसमाजे विवाहः न केवलं शरीरिकसम्बधमात्रम् अपितु सन्तानोत्पत्तेः धर्मगतः आधारो वर्तते। मनुमहर्षिणा प्रोक्तमस्ति यत् सर्वे आश्रमिणः गार्हस्थे एव संस्थितिं यान्ति ।[3] मूलतः पुरुषनार्योः व्यक्तित्वस्य विकासः वंशस्योत्थानं कुटुम्बस्य च संयोजनं विवाहेनैव सम्भाव्यते । अपरन्तु केचन विवाहस्य अनावश्यकतां वदन्ति । हिन्दूग्रन्थेषु तत्र तत्रोदाहरणैः विवाहस्य महत्त्वं निरूपितमस्ति। अभिज्ञानशाकुन्तले दुष्यन्तः अपुत्रत्वात् स्वकीयं जीवनं गर्ह्यं मनुते ।[4] क्वचिद् वीतरागः रुचिः पितॄणां मुक्तये वृद्धावस्थायां मालिन्या सह विवाहमकरोत् ।[5] अपिच काश्चन कन्याः याः तापसजीवनमेव सर्वस्वं मन्वते ताः अपि परलोककामनया विवाहपथमङ्गीकृतवत्यः ।[6] महर्षिमनुरपि एतत्तथ्यस्य समर्थनं करोति यत् विवाहं विना नारीणां जीवनं व्यर्थमेव । समासतः विवाहितजीवनं मनुष्यचरित्रस्य सर्वाधिकं प्रबलं प्रमाणमस्तीति कारणतः हर्षः **'दारपरिग्रहादभ्यागारिकोऽस्मि'** इत्युक्त्वा दुश्चरित्रस्याभियोगं निराकरोत् ।[7] अनेन ध्वनितं यत् विवाहः सार्वकालिकः सर्वग्राह्यश्चास्ति ।

'विवाह' इति शब्दस्य कृते संस्कृतसाहित्ये अनेके शब्दाः प्रचलिताः सन्ति । तद्यथा–उद्वाहः, परिणयः, उपयमः, पाणिग्रहणादयः। प्रायशः एतेषां सर्वेषां शब्दानां तात्पर्यार्थोऽस्ति यत् धर्मपुत्ररतिसुखाय पितृगृहात् विशिष्टरूपेण वध्वाः आनयनं तन्नाम धार्मिकरीत्या कस्याश्चित् कन्यायाः पाणिग्रहणमिति । विवाहविषये प्राच्याः पाश्चात्याश्च मान्यताः

पृथक् पृथक् सन्ति । इह हि सम्प्रति वरवध्वोः शास्त्रोक्तयोग्यताः विमर्शनीयाः।

परिणयप्रक्रियायां सर्वादौ वंशपरीक्षणमावश्यकमित्याश्वलायनः।[8] ततः वरस्य योग्यता सद्गुणैः निर्धारणीया । वरः उत्कृष्टः अभिरूप–कुलशीलसम्पन्नः यशोविद्यायुक्तः ब्रह्मचारी युवा श्रोत्रियश्च भवेत् ।[9] वरस्यायुःपरीक्षणं सर्वप्रथमं करणीयमिति केचन शास्त्रकाराः । यतो हि आयुर्हीनानां नराणां लक्षणैः किं प्रयोजनम् ? तत्पश्चात् चारित्र्य–बन्धु–शील–विद्याः परीक्ष्येरन् । चतुर्दश वराः अयोग्या इति स्मृतिकाराः। तद्यथा–संन्यस्ताः, लोकविद्विष्ठाः, मित्रबन्धुपरित्यक्ताः, विजातीयाः, रोगिणः, लिङ्गस्थाः, उदरम्भरिणः, प्रमत्ताः, पतिताः, सगोत्रियाः, अन्धबधिराः, अपस्माररोगग्रस्ताः, क्लीवाः, मूढाश्च । पुनश्च, गुण–शील–सौन्दर्यैः कन्याः चेतव्याः। शास्त्रैः कन्यायाः त्रिविधाः योग्यताः निर्दिष्टाः । ताश्च शरीरगताः बुद्धिगताः आचरणगताश्च सन्ति । किन्तु एताः अपि योग्यताः ध्यातव्याः–कन्या यवीयसी (वरस्यापेक्षया अल्यायुर्युता), अनन्यपूर्विका (अनाघ्रातपुष्पवत्) तथा च स्त्री[10] भवेत्। क्वचित् वित्त–रूप–प्रज्ञा–बान्धवैरुपेता कन्या वरणीया[11] तु क्वापि–

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् ।।[12]

काश्चन कन्याः अपि अयोग्याः भवन्ति । यथा–पिङ्गला, नाधिकाङ्गी, रोगिणी, रोमरहिता लोमयुता च, वाचाटा, नक्षत्रनदीनगखगाहिदासनाम्नी च कन्या विवाहस्य कृते अयोग्या अति मनुः ।[13]

हिन्दूधर्मशास्त्रेषु विवाहस्याष्ट प्रकाराः[14] दृश्यन्ते–ब्राह्म–दैवार्ष–प्राजापत्यासुर–गान्धर्व–राक्षस–पैशाचाः इति । एते विवाहाः पुरा येन केन प्रकारेण प्रचलिता आसन् । एतदतिरिच्य स्वयंवरः[15] अन्तर्विवाहः[16] अन्तर्जातीयविवाहः[17] एकविवाहः[18] बहुविवाहः[19] बालविवाहः[20] विधवाविवाहश्चासीत्[21]। उपर्युक्तेषु अष्टविधेषु विवाहेषु ब्राह्म/प्राजापत्यविवाहः वैज्ञानिकत्वात् उत्तमः इत्यतः साम्प्रतमपि एष एव विवाहः सर्वप्रचलितो विद्यते। अन्येषां दैवार्षादीनां विवाहानां चर्चा यद्यपि शास्त्रेषु दृश्यते तथाऽपि तेषां व्यविहारिकदृष्ट्या परिपुष्टिर्न भवति।





यज्ञमूलकः दैवविवाहः, यौतुक(दहेज)प्रथाप्रबलः आर्षः, कन्यायाः क्रयविक्रय–प्रधानः आसुरः, प्रेमावलम्बी गान्धर्वः, क्षत्रियानुगुणं शक्तिप्रदर्शनयुतः राक्षसः, वासनाप्रधानश्च पैशाचः। सूत्रकारैः स्मृतिकारैश्च समर्थितमस्ति विवाहद्वयम्–प्राजापत्यः गान्धर्वश्चेति। अनयोर्विवाहयोः वरः कन्या च परस्परं स्नेहसूत्रे संसक्तौ भवतः। समासतः स्वस्थगृहस्थजीवनाय प्राजापत्यविवाहः एव श्रेष्ठः। इदानीन्तनविवाहपद्धतिः प्राजापत्य–विवाहस्यैव संवर्धितं रूपं वर्तते । एषा विवाहपद्धतिः स्वकीये वर्णे जातौ धर्मे वा भवतीत्यतः एषः अन्तर्विवाहस्य द्रढीयान् आधारः ।

अन्तरजातीयविवाहः तन्नाम अनुलोम (उच्चवर्णीयः वरः निम्नवर्णीया कन्या) प्रतिलोम (निम्नवर्णीयः वरः उच्चवर्णीया कन्या) च पुरा बहुशः प्राप्यते । विवाहेनानेन सामाजिकविकासस्य मार्गः अवरुद्धः तथा च वैदिकसंस्कृतेर्ह्रासः आरब्धः । संस्कृतेः विनिमयार्थं बालविवाहस्य परिहारार्थञ्च अन्तरजातीयविवाह एव शरण्यः इत्याधुनिकप्रगतिवादिनः। शास्त्रेषु एषः विवाहः गर्ह्यः इति निश्चप्रचम् । एतस्मिन् विवाहे स्वस्थसमाजनिर्माणस्य नारीणां सम्माननीयस्थानस्य वैश्विकपरिदृश्ये प्रवर्तमानात् यौनरोगात् मुक्तेश्च महत्सम्भवनाः सन्ति । अतएव वैदिक–वाङ्मये [22] रामायणे [23] चापि विवाहोऽयं मर्यादितरूपेण प्रतिष्ठापितः आसीत्। बहुविवाहः बालविवाहश्च समाजे कुरीती आस्ताम् । सन्तानकामाय स्मृतिकारैः विधवाविवाहः सैद्धान्तिकरूपेण समर्थितः । [24] व्यवहारदृष्ट्या विधवाविवाहः धार्मिकनैतिकयोर्मूल्ययोः रक्षणार्थं नितरां श्लाघ्यः न तु नियोगपद्धतिः ।

प्राक्तनकाले आर्यसमाजे पतिपत्न्योः सम्बन्धः अत्यन्तं पावनः सुखदश्चासीत् । भार्या भर्त्रा, भर्ता च भार्यया सुतरां सन्तुष्टौ आस्तामित्यतः पारिवारिकमभ्युत्थानं दृश्यते स्म । पतिद्वारा पत्न्याः सततमादर आसीत्। त्रिवर्ग(धर्मार्थकाम)प्राप्तये पतिपत्न्योः सम्बन्धः अन्योन्याश्रितः आसीत् ।[25] पत्न्या विना किमपि धार्मिकं कृत्यं न सम्भाव्येत। पतिः भार्यानुरक्तः पत्नी च अनुव्रता स्यात्। पतिं प्रति पत्न्याः एकनिष्ठता भारतीये इतिहासे बहुधा प्राप्यते एव । आर्यसमाजे तदानीमेका उक्तिः प्रचलिता आसीत्–'पतिपत्न्योः सम्बन्धविच्छेदः मृत्युद्वारा एव, यतः तयोः पार्थक्यस्य

विधानमेव नास्ति ।' अतः तयोः पारस्परिकः सम्बन्धः अविच्छेद्यः आसीत्। एतदेव दाम्पत्यजीवनस्य मर्यादितस्वरूपम् ।

वैदिककाले पतिपत्न्योः सम्बन्धविच्छेदः , कासुचित् विशिष्टपरिस्थितिषु एव विहित आसीत्। पतिः मृतः प्रव्रजितः क्लीवः पतितः राजकिल्विषी दूरदेशवासी च भवेत् चेत् त्याज्यः आसीत् ।[26] जातिभ्रष्टः नपुंसकश्च पतिः परिहर्तव्यः इति धर्मसूत्राणि ।[27] अपि च बन्ध्या, केवलं कन्याजनित्री, मृतसन्तानसवित्री व्यभिचारिणी च पत्नी त्याज्या एव । अनास्थावती स्वैरिणी पतिघातिनी रोगिणी चापि भार्या सततं हातव्या । पतिप्रधानपरिवारत्वात् पुरुषः सम्बन्धविच्छेदं कृत्वापि सम्यक् जीवनं यापयन्ति स्म किन्तु नार्यः सम्माननयोग्याः न भवन्ति स्म ।

वस्तुतः विवाहस्य सम्बन्धविच्छेदविषये शास्त्रकारैः एकपक्षीयं सिद्धान्तं निरूपितम् । येन स्त्रीपुरुषयोः समाजे विषमता आगता । मनुना प्रोक्तं यत् पतिः दुःशीलः कामवृत्तः परस्त्रीगामी भवेत् चेदपि स देवतुल्यः पूजनीयः ।[28] नारीविषये विहितभिन्नव्यवस्था विमर्शनीया नास्ति खल्वत्र । सर्वाङ्गपूर्णचिन्तनात् अनन्तरमिदं वक्तुं शक्नुमः वयं यत् शास्त्रोक्तरीत्या अर्थात् सूत्रस्मृतिवेदगतप्रक्रियया कन्यादानद्वारा वरकन्ययोः योग्यतामभिलक्ष्य कृतं पाणिग्रहणं कदाचिदपि विच्छेद्यं न भवति । आध्यात्मिकं धार्मिकं नैतिकञ्च दाम्पत्यजीवनं भवेदिति पतिपत्न्योः स्वस्थचिन्तनं स्यात् । वैवाहिकजीवने कटुतायाः सम्बन्धविच्छेदस्य च स्थितिः नागच्छेत् तावत् सर्वथा पतिपत्नीभ्यामेव यतनीयम्।

## सन्दर्भसूची :-


1. विष्णुपुराणम्, 5.38.
2. याज्ञ०, 5.97
3. मनु०, 3.77
4. शाकुन्तलम्, 6.7, **धौताश्रुशेषमुदकं पितरः पिबन्ति ।**
5. मार्कण्डेयपुराणम्, अ० 85.90, श्लोकः 5
6. ब्रह्मपुराणम्, 99.1–5
7. हर्षचरितम्, (नि०सा०) **परीक्षेत मातृतः पितृतश्चेति।**





8. आ० गृ० सू०, 1.5, **'कुलमग्रे परीक्षेत मातृतः पितृतश्चेति ।**
9. मनु०, 9.88, याज्ञ०, 1.52,55, आप० गृ० सू०, 1.3.20.
10. मिताक्षरा, 1.51,
    **'स्त्रियः नपुंसकत्वनिवृत्तये स्त्रीत्वेन परीक्षताम् ।'**
11. भार० स्मृ०, 1.6
12. मनु०, 3.10
13. मनु०, 3.8–9.
14. विष्णुपुराणम्, 3.10.24.
15. ऋग्वेदः, 10.27.22, रामायणम्, 1.66.67, महाभारतम्, 54.8–9, रघुवंशम्, 6.7
16. श० ब्रा०, 13.2.9 8
17. याज्ञ०, 4.91–92, अथर्ववेदः, 4.17,8–9.
18. आप० ध० सू०, 2.5.12, **धर्मप्रजासम्पन्ने दारे नान्यं कुर्वीत।**
19. ऐ० ब्रा०, 12.11, पा० गृ० सू०, 1.4.8–11.
    अभि०, अंक 3, **बहुवल्लभा हि राजानः श्रूयन्ते।**
21. गौ० ध० सू०, 9.59, महाभारतम्, 13.12–19.
    **नारी तु पत्यभावे देवरं वृणुते पतिम्।**
22. अर्थर्ववेदः, 14.2.6
23. रामायाणम्, 9.97.7.
24. मनु०, 9.59,
    **देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।**
    **प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ।।**
25. मार्कण्डेयपुराणम्, 27.10
26. अथर्ववदः9.5.26.27, पराशरस्मृतिः, 4.24 नारद०, 12.97
27. बौ० ध० सू०, 8.2.26.
28. मनु०, 5.154.


❋ ❋ ❋

दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट नं० 5 झण्डेवाल, करोल बाग, नई दिल्ली 5

त्रिदिवसीय संस्कृत सम्मेलन वर्ष 2001-2002

दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा अप्रैल 2002 में त्रिदिवसीय संस्कृत सम्मेलन का आयोजन करने जा रही है। जिसमें निम्नलिखित बिन्दुओं के विभिन्न पक्षों पर लेख वाचन एवं चर्चा होगी।

1. संस्कृत वाङ्मय में जीवन दर्शन
2. संस्कृत वाङ्मय में अन्तरिक्ष विज्ञान
3. संस्कृत वाङ्मय में भूभर्ग विज्ञान
4. संस्कृत वाङ्मय में प्राणी विज्ञान

उक्त प्रस्तावित विषयों में से किसी एक पर कम से कम सारगर्भित 10 पृष्ठों के लेख विद्वान् वक्ता वाचन कर सकता है। लेख की भाषा संस्कृत होनी आवश्यक है। विशेष परिस्थिति में हिन्दी में भी लेख स्वीकार किये जा सकते हैं।

उक्त सम्मेलन में लेखों का चयन करने के पश्चात् ही प्रतिभागी विद्वान् को आमंत्रित किया जाएगा। कृपया अपनी स्वीकृति 28.2.2002 तक भेजने की कृपा करें साथ ही दिनांक 31.3.2002 तक लेख प्रेषित करने का कष्ट करें।

**श्री कृष्ण सेमवाल**
सचिव
दिल्ली संस्कृत अकादमी
दिल्ली सरकार, दिल्ली



# श्रीवैष्णवपरम्परायाः पञ्चायुधस्तोत्रं महाकविभासस्य पञ्चायुधवर्णनं च

डॉ० राजकिशोर मिश्रः "शास्त्री"

श्री वैष्णवपरम्परायां सर्वत्र पञ्चायुधस्तोत्रस्य महत्त्वं दृश्यते। श्रद्धया वैष्णवाः मन्दिरेषु पठन्ति। पञ्चायुधस्तोत्रं श्रीवैष्णवानां प्राचीनं स्तोत्रं विद्यते। सम्भवतया दक्षिणभारतीयपरम्परायामस्य स्तोत्रस्य रचना विद्यते। महाकविभासीयरूपकाणामामुपलब्धिः 1906 ई० वर्षे केरल–प्रान्ते अभवत्। तेषां प्रकाशनं टी. गणपतिशास्त्रिमहाभागेन 1912 ई० वर्षे कृतम्। कस्यानुकरणं केन कृतमिति निश्चयेन वक्तुं न शक्यते। किन्तु महाकविभासकृतस्य पञ्चायुधानां वर्णनमुत्तरभारते श्रीवैष्णवपरम्परायाः सुव्यवस्थितं स्वरूपं प्रमाणयति। महाकविभासस्यानुशीलनेनापि श्रीवैष्णव–परम्परायाः परिचयो भवति।

श्रीवैष्णवपरम्परायां भगवतो विष्णुदेवस्य श्रीकृष्णरूपेणार्चनं वन्दनं स्मरणञ्च भवति । तत्रैव विविधावताराणां चर्चा भवति । भासनाटकचक्रे महाकविभासस्याराध्यः साक्षात् श्रीनारायणो विद्यते। तस्यैव विविधावताराणां चर्चा चर्चिता विद्यते पदे–पदे भासस्य साहित्ये। यथा–दूतवाक्ये, साक्षात् नारायणस्योपेन्द्रस्य वर्णनम् –

**पादः पायादुपेन्द्रस्य सर्वलोकोत्सवः स वः ।**
**व्याविद्धो नमुचिर्येन तनुताम्रनखेन खे ।।**[1]

अस्यां परम्परायां मूलमन्त्रो वर्तते "**ॐ नमो नारायणाय**"। दूतवाक्ये[2] सुदर्शनचक्रस्य "**जयतु भगवान् नारायणः**"। अथवा "**त्रिचराणातिक्रान्त[3]त्रिलोको नारायणः खल्वत्र भगवान् । शरणं व्रजन्तु भवन्तः।**" इति संबोधनं भगवतः श्रीकृष्णस्य नारायणवर्णनं श्रीवैष्णवत्वं सम्पादयति। अथ च वैष्णवानां "**शरणागति**"संस्कारस्य

चर्चा प्रकारान्तरेण करोति । अत्रैव श्रीकृष्णस्यावताररूपेणापि चर्चा विद्यते –

**महीभारापनयनं कर्तुं जातस्य भूतले**[4]

श्रीकृष्णस्य पञ्चायुधानां मनोमुग्धकारि वर्णनमुत्तरभारते विशिष्टां श्रीवैष्णवपरम्परां संकेतयति । अस्यां परम्परायां भगवतः नृसिंहस्य वामनस्य च विशिष्टा चर्चा वर्तते । अत्रैव विशिष्टव्रतरूपेण नृसिंह–चतुर्दशी वामनद्वादशी च प्रसिद्धा वर्तते । कर्णभारे भगवतः नृसिंहस्य श्रीवैष्णवानां परमाराध्यस्य सुन्दरं परम्परानुरूपं वर्णनमुपलभ्यते ।

**नरमृगपतिवर्ष्मालोकनभ्रान्तकारी**
**नरदनुजसुपर्वव्रातपाताललोकः ।**
**करजकुलिशपाती भिन्नदैत्येन्द्रवक्षाः**
**सुररिपुहन्ता श्रीधरोऽस्तु श्रिये वः ।।**[5]

अत्र "श्रीधरः" इति पदेन इन्दिरापतेः लक्ष्मीनारायणस्य श्रीवैष्णव–परमाराध्यस्यापि नृसिंहेन सह चर्चा विद्यते । तथैव "दूतघटोत्कच" इत्याख्ये रूपके भगवतो नारायणस्य यथा–**"नारायणस्त्रिभुवनैक–परायणो वः। पायादुपायशतयुक्तिकरः सुराणाम्।**[6] एवं मध्यमव्यायोगे भगवतः वामनस्य साहित्यिकवर्णनमस्याः परम्परायाः साक्षात् समर्थनं करोति ।

**पायात्स वोऽसुरवधूहृदयावसादः**
**पादो हरेः कुवलयामलखड्गनीलः ।**
**यः प्रोद्यतस्त्रिभुवनक्रमणे रराज**
**वैदूर्यसंक्रम इवाम्बरसागरस्य ।।**[7]

एवं हि पञ्चरात्रे नाटके आदिपुरुषरूपेण मुद्रालंकारेण वर्णनं वर्तते ।[8] श्रीकृष्णस्यैवापरनाम्ना बालचरित्रमिति[9] नाटके दामोदररूपेण तथा ऊरुभङ्गनाटके "केशव"रूपेण[10] च वर्णनं श्रीमन्नारायणस्य श्रीवैष्णवाराध्यत्वं समर्थयति ।

एवंक्रमे पञ्चायुधानां चर्चा आवश्यकी विद्यते । दूतवाक्ये[11] बालचरिते [12] च भिन्न–भिन्नरूपेण भगवतः श्रीनारायणस्य पञ्चायुधानां शोभनं परम्परानुरूपं वर्णनं विद्यते । अत्रैव परम्परागतपञ्चायुधस्तोत्रेण



सह भासकृतवर्णनस्यादभूतं साम्यं हृदयावर्जकं वर्तते । यथा–सुदर्शनचक्रस्य वर्णनं पञ्चायुधस्तोत्रे–

**स्फुरत्सहस्रारशिखातितीव्रं सुदर्शनं भास्करकोटितुल्यम् ।**
**सुरद्विषां प्राणविनाशि विष्णोश्चक्रं सदाहं शरणं प्रपद्ये ।।**[13]

तथैव सुदर्शनचक्रस्य वर्णनं बालचरित्रे –

**चक्रोस्मि कृष्णस्य कराग्रशोभी**
**मध्याह्नसूर्यप्रतिमोग्रतेजाः ।**
**त्रिविक्रमे चामृतमन्थने च**
**मया हता दानवदैत्यसङ्घाः ।**[14]

अत्र भास्करकोटितुल्यं, सुरद्विषां प्राणविनाशि चेति विशेषणद्वयेन सह मध्याह्नसूर्यप्रतिमोग्रतेजाः हता दानवदैत्यसङ्घा इति विशेषण–द्वयस्यादभुतं साम्यं दृश्यते ।

पाञ्चजन्यस्य शङ्खस्य वर्णनं यथा पञ्चायुधस्तोत्रे

**विष्णोर्मुखोत्थानिलपूरितस्य**
**यस्य ध्वनिर्दानवदर्पहन्ता ।**
**तं पाञ्चजन्यं शशिकोटिशुभ्रं**
**शङ्खं सदाहं शरणं प्रपद्ये ।।**

भासस्य दूतवाक्ये शङ्खस्य वर्णनं यथा–

**पूर्णेन्दुकुन्दकुमुदोदरहारगौरो**
**नारायणाननसरोजकृतप्रसादः ।**
**यस्य स्वनं प्रलयसागरघोषतुल्यं**
**गर्भा निशम्य निपतन्त्यसुराङ्गनानाम् ।**

अत्र "विष्णोर्मुखोत्थानिलपूरितस्य" "शशिकोटिशुभ्रं" चेति विशेषणद्वयेन सह नारायणाननसरोजकृतप्रसादः पूर्णेन्दुकुन्दकुमुदोदरहार–गौरः इति विशेषणद्वयस्याभिख्या पूर्णा विद्यते।

तथाहि कौमोदकीगदायुधवर्णने पञ्चायुधस्तोत्रे **हिरण्मयीं मेरु–समानसारां कौमोदकीं दैत्यकुलैकहन्त्रीं गदां सदाहं शरणं प्रपद्ये ।।** तद्यथा दूतवाक्ये

**मणिकनकविचित्रा चित्रमालोत्तरीया**
**सुररिपुगणगात्रध्वंसने जाततृष्णा ।**
**गिरिवरतटरूपा दुर्निवारातिवीर्या**
**व्रजति नभसि शीघ्रं मेघवृन्दानुयात्रा ।।**

अत्र "हिरण्यमयीं, मेरुसमानसारां दैत्यकुलैकहन्त्रीम्" एतेषां विशेषणानां दूतवाक्यस्य मणिकनकविचित्रा, गिरिवरतटरूपा दुर्निवारातिवीर्या, सुररिपुगणगात्रध्वंसने जाततृष्णा इत्येतैः विशेषणैः सह महत् साम्यं प्रतीयते। बालचरितस्य गदावर्णनं सामान्यमस्ति । अन्यस्य आयुधस्य शाङ्र्गस्य नन्दकस्य च वर्णनं यद्यपि दूतवाक्ये बालचरिते च मनोहारि वर्तते किन्तु पञ्चायुधस्तोत्रेण सह विशेषरूपेण साम्यं न प्रतिभाति । श्रीवैष्णवपरम्परायां भगवतः श्रीनारायणस्य वाहनं गरुडो विद्यते । गरुडस्य वर्णनं दूतवाक्ये परम्परागतरूपेण वर्तते । यथा –

**अहं सुपर्णो गरुडो महाजवः**
**शाङ्र्गायुधस्यास्य रथो ध्वजश्च ।**
**पुरा हि देवासुरविग्रहेषु**
**वहामि भो विष्णुबलेन विष्णुम् ।।**[15]

महाकविभासस्य सर्वेषां रूपकाणामनुशीलनेन प्रतिभाति यदुत्तरभारते श्रीवैष्णवानां समृद्धा व्यवस्थिता च परम्परा आसीत् । सा परम्परा दक्षिणभारतात् भिन्ना प्रतीयते । अस्याः परम्परायाः विशिष्टविधीनामनुसंधानमावश्यकं विद्यते । अहमपि भासेन सह भगवतो लक्ष्मीनारायणस्य कृते तेनैव पद्यमुखेन नमस्काराञ्जलीः समर्पयामि –

**अव्यक्तादिरचिन्त्यात्मा लोकसंरक्षणोद्यतः ।**
**एकोऽनेकवपुः श्रीमान् द्विषद्बलनिषूदनः ।।**

## सन्दर्भसूची


1. दूतवाक्यम् – 1/1
2. दूतवाक्यम्
3. दूतवाक्यम्
4. दूतवाक्यम् – 1/46
5. कर्णभारम् श्लोक – 1/1
6. दूतघटोत्कच् – 1/1
7. मध्यमव्यायोगम् – 1/1
8. पञ्चरात्रम् – 1/1
9. बालचरितम् – 1/1
10. ऊरुभङ्गम् – 1/1
11. दूतवाक्यम्, प्रथमाङ्कः
12. बालचरितम्, प्रथमाङ्कः
13. पञ्चायुधस्तोत्रम् – 1–5
14. बालचरितम् – 1/21
15. दूतवाक्यम् – 1/43


* * *



# काव्यरचनायामनुपरीक्षातत्त्वम्

डा० मृदुला राय

प्राकृतमनुष्याणां बुद्धौ असम्भववत् प्रतीतावपि रसप्रधानेषु काव्येषु अलंकरोऽपृथग्यत्ननिर्वर्त्यः भवतीति तत्त्वं निर्विवादकोट्यात्मना काव्यसरणिव्यवस्थापकाचार्येण श्रीमतानन्दवर्धनेन –

**रसाक्षिप्ततया यस्य वन्धः शक्यक्रियो भवेत् ।**
**अपृथग्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनौ मतः ।।**[1]

सिद्धान्तमेतदन्यत्रापि दृश्यते –

**न चालंकारनिष्पत्त्यै रसबन्धोद्यतः कविः ।**
**यतते ते हि तत्सिद्धिनान्तरीयकसिद्धयः ।।**

अनेन कोऽपि चिन्तयितुं शक्नोति यत् काव्ये अलंकारसंयोजनावत् काव्यरचनापि अपृथग्यत्ननिर्वर्त्या एव । काव्यस्योपस्थापनं केवलं रसावेशत एव भवति । यथास्ति ध्वन्यालोके –

**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।**[2]

किन्तु वस्तुस्थितिर्नैवंविधा। यतो मुनेः शोक एव न श्लोकः। तथा सति तद्दुःखेन मुनिरपि दुःखितो भवेत् । तदुक्तमभिनवगुप्तपादेन–**"न तु मुनेः शोक इति मन्तव्यम्। एवं हि सति तद्दुःखेन सोऽपि दुःखित इति कृत्वा रसस्यात्मतेति निरवकाशं भवेत्। न च दुःखसन्तप्तस्यैषा दशेति।"**[3] अतः शोकं श्लोकं चान्तरा अस्ति कापि व्यापारपरम्परा। तन्मध्ये रचितकाव्यस्य पाण्डुलिपिसंस्काररूपो यो व्यापारः स एवास्माकं विमर्शनविषयः ।

सुविज्ञेयमेतत् यत् केवलं शब्दस्यार्थस्य च साधारणसाहित्यं न

काव्यम् । किन्तु परस्परस्पर्धित्वरमणीया भवति अनयोर्विन्यासभङ्गी । यथा भणति कुन्तकः –

**साहित्यमनयोः शोभाशलितां प्रति काप्यसौ।**
**अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः।।**[4]

कोलरिज्नामधेयेन पाश्वात्यपण्डितेनाप्युक्तम्–It is rather easy to take out a slab from a piramid, but it is extremely difficult, nay imposible to take out an expression from the structure of poetry.[5] काव्यस्य या इयं परिवृत्त्यसहरूपा परिनिष्ठितावस्था तन्निर्माणजगति न केवलं काव्यस्य रसाक्षिप्तमूर्त्तौ तिष्ठति किन्तु ग्रहणवर्जनादिसंस्काररूपो यो व्यापारः सोऽपि काव्यमूर्तिनिर्माणे नियामको भवति।

काव्ये संस्कारस्यानुपरीक्षणस्य वा किं प्रयोजनम् ? संस्कारो हि सर्वस्य गुणमुत्कर्षति। स हि कवित्वप्रकर्षमादधाति। तेन काव्यं, दोषरहितं गुणादिसमन्वितं च भवेत्। "कृत्तद्धितसमासानां सम्बन्धाभिधायित्वं भावप्रत्ययेन" इति नियमात् समासयुक्तात् सहितशब्दात् भाववचनस्य ष्यञो योगेन निष्पन्नः साहित्यशब्दः सम्बन्धवचनः। सहितयोः शब्दार्थयोः सहितानां वा शब्दार्थतदगतविशेषणानां सम्बन्धः साहित्यम्। सम्बन्धः चासौ त्रिषु स्कन्धेषु प्रत्येकं चतुर्विधत्वेन द्वादशात्मा।

**वृत्तिर्विवक्षा तात्पर्यप्रविभागाविहोदितौ**
**ततो व्यपेक्षासामर्थ्याऽन्वयश्चैकार्थभावना।।**
**दोषहानं गुणादानं तथालंकारयोगिता**
**रसावियोग इत्येते सम्बन्धाः कथिता बुधैः।।**[6]

इति शृङ्गारप्रकाशे भोजराजस्य तथा भावप्रकाशने शारदातनयस्य द्वादशसम्बन्धात्मकं साहित्यम्। एषु विभागेषु प्रथमे अष्टावेव साहित्यम्, शेषाः चत्वारस्तु तत्परिष्कारका इति साहित्यमीमांसाकारः।

**वृत्त्यादीनां समष्टिः स्यात् साहित्यं, तत्परिष्कृतिः।**
**दोषत्यागो गुणाधानमलंकारो रसान्वयः।।**



अतः काव्यस्य परिष्कारकाः ये दोषत्यागादयः तेषामौज्ज्वल्यम् अनुपरीक्षणेनोज्ज्वलतरं भवेदित्यत्र नास्ति कस्यापि विप्रतिपत्तिः। तदुक्तं भामहेन –

**पदमेकं परं साधु नार्वाचीननिबन्धनम्।**
**वैपरीत्याद्विपर्यासं कीर्त्तेरपि करोति तत्।।**[7]

अस्ति केशवमिश्रस्यालंकारशेखरेऽपि –

**दोषः सर्वात्मना त्याज्यो रसहानिकरो हि सः।**
**अन्यो गुणोऽस्तु वा मास्तु महान् निर्दोषता गुणः।।**

अतः काव्ये एकमपि दुष्टं स्थानं नोपेक्ष्यम्। अन्यथा काव्यं कुकाव्यं भवेत्। तत्तु सर्वथा निन्दनीयम्। उक्तं यथा भामहेन –

**नाकवित्वमधर्माय व्याधये दण्डनाय वा।**
**कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः।।**[8]

अतो दोषहानादिक्रिया काव्यस्य सुमूर्त्ततापदानार्थं कवेः अनुपरीक्षा कर्त्तव्या।

विदितमेतत् सर्वेषां यत् काव्ये कवयो व्याकरणाभिधाना–दिकमनुसरन्ति किन्तु प्रयोजनानुरोधेन तदतिक्रामन्ति च। व्याकरणसिद्धयेऽपि काव्ये के शब्दा अग्राह्याः, के च ग्राह्या इत्यधिकृत्य काव्यालंकारस्य षष्ठपरिच्छेदे सुविस्तृतमालोचितं भामहेन –

**वक्रवाचां कवीनां ये प्रयोगं प्रति साधवः।**
**प्रयोक्तुं ये न युक्ताश्च तद्विवेकोऽयमुच्यते।।**
**नाप्रयुक्तं प्रयुञ्जीत चेतःसम्मोहकारिणम्।**
**तुल्यार्थत्वेऽवि हि ब्रूयात् को हन्ति गतिवाचिनम्।।**[9]

काव्ये शब्दगुम्फनं कीदृशं भवेत् तद्विषये भामहस्याभिमतम् –

**एतद्ग्राह्यं सुरभिकुसुमं ग्राम्यमेतन्निधेयं**
**धत्ते शोभां विरचितमिदं स्थानमस्यैतदस्य।**
**मालाकारो रचयति यथा साधु विज्ञाय मालां**
**योज्यं काव्येष्ववहितधिया तद्वदेवाभिधानम्।।**[10]

अत्रेदं स्मर्त्तव्यं यत् यद्यपि काव्यप्रकाशकाराः **"शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे"** इति काव्यकारणमाह, तथापि काव्यबीजस्वरूपायाः प्रतिभाया अभावेऽपि यत्नवतां शास्त्रानुशीलनपराणां कवीनां कथञ्चित् फलसिद्धिः भवत्येव। तदाह काव्यादर्शकारः –

**न विद्यते यद्यपि पूर्ववासनागुणानुबन्धि प्रतिभानमद्भुतम्।**
**श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्।।**
**तदस्ततन्द्रैरनिशं सरस्वती श्रमादुपास्या खलु कीर्त्तिमीप्सुभिः।**
**कृशे कवित्वेऽपि जनाः कृतश्रमा विदग्धगोष्ठीषु विहर्त्तुमीशते।।**[11]

काव्यरचनाकाले रसावेशतः कवेः यथायथशब्दनिर्वचनादिविषया विवेक्त्री दृष्टिः न तथा सावधानां भवति ; ततोऽनुपरीक्षा अवश्यं करणीया। तदुक्तं राजशेखराचार्येण –

**"रसावेशतः काव्यं विरचयतो न च विवेक्तृदृष्टि–स्तस्मादनुपरीक्षेत।"**[12]

कदा केन सहानुपरीक्षा कर्त्तव्या ? राजशेखरस्य मतानुसारेण द्वितीये प्रहरे कविः काव्यक्रियां कुर्यात्। चतुर्थे प्रहरे भवेत् काव्यस्य परीक्षा। तदा कविः एकाकी परिमितपरिषद्युक्तो वा तिष्ठेत्। एककित्वादि तु काव्यरचनाया अपि पूर्वम् अपेक्षितम् वामनाचार्येण –

**"चित्तैकाग्र्यमवधानम्। तद्देशकालाभ्याम्। विविक्तो देशः रात्रियामस्तूरीयः कालः।**[13] अवहितमेव चित्तमर्थान् सम्यक् पश्यति। तस्यावधारणस्य कृते पुनः समुचितदेशः समुचितकालश्च चेतव्यौ । विविक्ते देशे तुरीये यामे यदा विषयोपहतं चित्तं प्रसन्नतामवधत्ते तदा एव काव्यसरस्वत्या आराधनाकालः ।

अथ केन मानदण्डेन भवेदनुपरीक्षणम् ? निरूपितमत्र चतुःसूत्रीरूपं मानदण्डं श्रीमता राजशेखरेण – १. अधिकस्य त्यागः, २. न्यूनस्य पूरणम्, ३. अन्यथास्थितस्य परिवर्तनम्, ४. प्रस्मृतस्यानुसन्धानं च।

काव्यरचनाकाले रसावेशात् भावादीनां शब्दादीनां वाधिकयोगोऽनु–परीक्षाकाले त्यजनीयः एव । आलोचितो भामहेनोपमानाधिकत्वदोषः ।



**स पीतवासः प्रगृहीतशाङ्र्गो**
**मनोज्ञभीमं वपुराप कृष्णः।**
**शतह्रदेन्द्रायुधवान्निशायां**
**संसृज्यमानः शशिनेव मेघः।।**[14]

अत्रोपमेयः कृष्णः, उपमानं मेघः। कृष्णस्य द्वे विशेषणे पीतवासत्वं प्रगृहीतशाङ्र्गत्वं च। उपमानभूतस्य मेघस्य तु त्रीणि विशेषणानि विद्युत्वत्त्वम्, इन्द्रायुधयुक्तत्वं शशिमत्त्वञ्च। अतः कृष्णपक्षे शशिनोपमानयोग्यं किमपि वस्त्वत्र नोल्लिखितम्। तस्मादत्रोपमानाधि–कत्वदोषप्रसक्तिः। अनुपरीक्षाकाले एतत् सर्वं सर्वथा वर्जनीयम्।

**स मारुताकम्पितपीतवासा**
**बिभ्रत्सलीलं शशिभासमब्जम्।**
**यदुप्रवीरः प्रगृहीतशाङ्र्गः**
**सेन्द्रायुधो मेघ इवावभासे।।**[15]

अत्र शक्रचापग्रहणात् कार्मुकं दर्शितम्। किन्तु वासशङ्खयोः समगुणयुक्ते पदे न स्तः। अनुपरीक्षाकाले एतत् सर्वं पूरणीयम्।

काव्यरचनाकाले भावानां शब्दानां च शृङ्खलारहितत्वे सञ्जाते तेषामपि परिवर्तनं कर्त्तव्यम्। अन्यथा विरोधरसाभिव्यक्ति–अक्रमत्व–भग्नप्रकमत्वेत्यादिदोषसम्भावना जायेत। परिहार्याः खलु ते दोषाः।

पाण्डुलिपिरचनाकले किमपि वस्तुजातं यदि विस्मृतं भवेत्तर्हि तस्यानुसन्धानमप्यस्मिन्नवसरे कर्त्तव्यम्। अनेन काव्ये विसन्ध्यादि–दोषसम्भावना न स्यात्। काव्यस्य रसोत्तीर्णत्वादिकमभिवाञ्छन्तः सुमेधसः कवय इत्थंप्रकारेण चतुःसूत्रीपद्धतिप्रयोगद्वारेण काव्यनिर्माणं कुर्यात् । तदुक्तं राजशेखरेण –

**"अधिकस्य त्यागो न्यूनस्य पूरणम्, अन्यथास्थितस्य परिवर्तनम्, प्रस्मृतस्यानुसन्धानं च इत्यहीनम्।"**[16]

तदा काव्यमहीनं भवेत्। अनेनैव प्रकारेण काव्यस्य स्थैर्यं सम्पादनीयम्। उक्तं वामनाचार्येणापि पदाधानोद्धरणावेक्षणम्। अत्र श्लोकौ –

आधानोद्धरणे तावत् यावद्दोलायते मनः।
पदस्य स्थापिते स्थैर्येऽन्तसिद्धा सरस्वती।।
यत् पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम्।
तं शब्दन्यासनिष्णाताः शब्दपाकं प्रचक्षते।।[17]

इत्थं शब्दार्थपाकनिष्णातः कविः यथार्थकाव्यनिर्माणे समर्थो भवेत्। केवलं तदैव निरातङ्कं भवेत् कवेः काव्यमयं वपुः। तदुक्तं भामहेन –

**उपेयुषामपि दिवं सन्निबन्धविधायिनाम्।**
**आस्त एव निरातङ्कं कान्तं काव्यमयं वपुः।।[18]**

**सन्दर्भसूची**


1. ध्वन्यालोकः, 2/16
2. ध्वन्यालोकः, 1/5
3. ध्वन्यालोक–लोचनम्, 1/5
4. वक्रोक्तिजीवितम्, 1/17
5. Fourteenth Century Literary Criticism
6. काव्यालंकारकारिका, रेवाप्रसाद द्विवेदी
7. काव्यालंकारः, 5/61
8. काव्यालंकारः, 1/12
9. काव्यालंकारः, 6/23–24
10. काव्यालंकारः, 2/56
11. काव्यालंकारः, 1/104–105
12. काव्यमीमांसा, दशमोऽध्यायः
13. काव्यालंकारसूत्रवृत्तिः, 1/3/17–20
14. काव्यालंकारः, 2/58
15. काव्यालंकारः, 2/41
16. काव्यमीमांसा, दशमोऽध्यायः
17. काव्यालंकारसूत्रवृत्तिः, 1/3/15
18. काव्यालंकारः, 1/6


* * *



# कालिदासस्यार्थिकविचारः

डॉ० श्रीपरमहंसरायः, एम्. ए., पी-एच्. डी. (लंदन)

कविः स्वसमयस्य प्रतिनिधिर्भवति। स जीवनस्य व्याख्यां तथा करोति यथा तत्कालीनसामाजिकार्थिकराजनैतिकपरिस्थितीनां बोधः सम्यक् प्रकारेण जायते। कविकुलगुरुः कालिदासः युगप्रवर्त्तकः कविरस्ति। स स्वरचनासु राष्ट्रस्य समस्ताङ्गानामभिव्यञ्जनां सुन्दररूपेण कृतवान्। कामसूत्रे वात्स्यायनेन अर्थस्य या परिभाषा व्यलेखि, तस्याः व्यावहारिकः प्रयोगः कालिदासस्य ग्रन्थेषु लभ्यते। वात्स्यायनो लिखितवान्–

**'विद्याभूमिहिरण्यपशुधान्यभाण्डोपस्करमित्रादीनामर्जन–मर्जितस्य विवर्धनमर्थः'** १।२।६

वस्तुतोऽर्थेन शरीरस्य सम्बन्धोऽस्ति। जीवनस्य समस्तकामनाः अर्थद्वारेण सम्पद्यन्ते। भोजनवस्त्रादिभिर्विनापि शरीरस्थितिः न सम्भाव्यते। अतो जीवनस्यानिवार्यावश्यकतासु स्थानमर्थस्यास्ति। महाकवि–कालिदासेनापि जीवनस्य महत्त्वपूर्णाङ्गरूपेणार्थः स्वीकृतः। कविना आर्थिकायसाधनेषु कृषिव्यवसायारण्यखन्यादीनां गणना कृता। तद्दृष्टौ जीवननिर्वाहस्य प्रमुखसाधनं कृषिरस्ति। अथेयं कृषिर्वर्षाधीनास्ति। अतएव 'मेघदूत'स्य निम्नश्लोके कृषकललनाभिः कृतं सादरं मेघदर्शनमुपन्यस्तम्–

**त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः**
**प्रीतिस्निग्धैः जनपदवधूलोचनैः पीयमानः ।**
**– पूर्वमेघः 16**

गोचरभूमिः पशुभ्यः ग्रासं ददाति येन पशुसम्पत् समृद्धा भवति । व्यक्तिसमाजोभयकृते पशुधनस्योपयोगः सर्वाधिकोऽस्ति। एतदेव कारणमस्ति यत् महाकविकालिदासेनैकस्याः गोः रक्षायै चक्रवर्तिना

सम्राजा दिलीपेन प्राणविसर्जनस्य संकल्पः कारितः। भारतसदृशविशाल–राष्ट्राय पशुसम्पदः समृद्धिसंरक्षणे परमावश्यके। दिलीपः सिंहं प्रति गोसंरक्षणाय यं तर्कमुपस्थापयति, तस्यायमाशयो यत् गौः न केवलं पयो ददाति, प्रत्युत विभिन्नप्रकारैः सा राष्ट्रस्य सर्वाङ्गीणसमृद्धौ पूर्णसहयोगं ददाति। वस्तुतः सा राष्ट्रायान्वर्थकामधेनुरस्ति। अतएव सा कविना कामदुघेत्यभिहिता[1]। महाकविना केवला गौरेव नो पशुधनेषु स्वीकृता, प्रत्युत तेषु वृषभा[2]श्वगर्दभोष्ट्र[3]गजादीनामपि वर्णनं कृतम्। मालविकाग्निमित्रे त्वेकः पालितमर्कटोऽपि निर्दिष्टोऽस्ति, यो नाम्ना पिंगलः कथ्यते स्म। एतेन तद्युगे वानराणा[4]मप्युपयोगितार्थिकदृष्ट्या लक्ष्यते।

कविना पशुसम्पद् वर्गद्वये विभक्ता। वन्यपशु[5]र्ग्रामपशुश्च। वन्यपशुषु सिंह[6]सूकर[7]–महिष[8]–मृगा[9]दीनां निर्देशोऽस्ति। मृगाणामपि कियन्तो भेदाः वर्णिताः सन्ति, येषु मृगनाभिकृष्णसारौ[10] प्रधानौ स्तः।

महाकविकालिदासः पर्वतीयगोचरभूमिषु चरन्तीभ्यः मेषिकाभ्यः प्राप्यामूर्णां व्यक्तिसमाजकृत आवश्यकीममन्यत। पशुभ्यः जीवनस्याहारा–भरणादीनि सर्वाण्यावश्यकवस्तून्युपलभ्यन्ते स्म। अतएव कविना पशुसंपत्संरक्षणाय विशिष्टं बलं प्रदत्तम्।

कविदृष्टौ द्वितीयमार्थिकमहत्त्वं वृक्षसंरक्षणस्य वर्त्तते। स एतद्राष्ट्रस्य हिमालयधेनुदेवदारुषु त्रिषु प्रधानप्रतीकेषु देवदारुवृक्षः देशस्य सर्वाधिकमहत्सम्पद्रूपेणाधिकृतः। एतत्सत्यमस्ति यत् प्रतिवर्षं लक्षाधिक–मुद्राणामायो देवदारुवृक्षेभ्यो जायते। कविः सिंहमुखेन दिलीपसमक्षं कथितवान् यत् अयं विशालः सम्मुखे दृश्यमानो देवदारुवृक्षः शङ्करेण पुत्रीकृतोऽस्ति। पार्वत्येनं पुत्रसदृशं मनुते। एकदैकेन वन्यद्विपेन स्वगण्ड–स्थलघर्षणेन त्वगस्योन्मथिता, येन पार्वती दैत्यबाणाहताय कार्तिकेयाय विहिताच्छोकादप्यधिकं शोकं कृतवती। ततः प्रभृत्येव शङ्करेण वनगजान् हिंस्रप्राणिनश्च मारयितुमत्राहं रक्षको नियुक्तः। मम भोजनञ्चात्रागत–पशुभिरेव संपद्यते–



**अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन।**
**यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः।।**
**— रघुवंशम् २।३६**

एतदेवायाति यत् कविदृष्टौ वृक्षाणां वनानाञ्चातिमहत्त्वमस्ति। अधुनापि वैज्ञानिकयुगे दृश्यते वर्षाकारणं वृक्षराजिर्वर्तते। अनेनैव हेतुनास्माकं भारतीयशासनेनापि वृक्षरक्षणार्थं वृक्षरोपणप्रचारो विधीयते। पुरातनकाले कालिदाससमक्षमपि समस्येयमासीत्। अनेनैव कारणेन वृक्षसंरक्षणस्या–वश्यकता तेन प्रदर्शिता। ऋषीणामाश्रमेषु वृक्षास्तेषां समस्तावश्यकतानां पूर्तिमकुर्वन्। तैः नागरिकजीवनमपि प्रभावितमासीत्। कालिदासोऽभिज्ञान–शाकुन्तलस्य चतुर्थाङ्के शकुन्तलागमनवेलायां कण्वमुखेन वृक्षात् शकुन्तलागमनानुमतिं याचितवान्, यतः शकुन्तला तत्रत्यवृक्षाणां सम्यक् प्रकारेण संवर्द्धनं करोति स्म। एतद्वृक्षाणां जीवनधारणायात्यन्त–महत्त्वमासीत्। शकुन्तला येन प्रकारेण वृक्षाणां सेवनं करोति स्म, संभवतः तेनैव प्रकारेण भारते वृक्षसेचनमभवत्।

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आदौ वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः,**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।**
**— अभिज्ञान०४।६**

कालिदासदृष्टौ वनस्पतिजगतोऽत्यधिकमार्थिकमहत्त्वमस्ति। तस्य मान्यता वर्त्तते यद् वृक्षेभ्यो वस्त्रावासभूषणानां त्रयाणामपि प्राप्तिः संभाव्यते। शकुन्तलागमनावसरे कण्वशिष्यो वृक्षेभ्य एवोत्तमवस्त्राभूषणानि प्राप्नोति–

**क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं,**
**निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित्।**
**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै–**
**र्दत्तान्याभरणानि नः किसलयोद्भेदप्रतिद्वन्द्विभिः।।**
**—अभि० ४।५।**

शकुन्तलार्थं कण्वशिष्याय केनचिद् वृक्षेण शशितुल्यं श्वेतमङ्गलमयं कौशेयवस्त्रं प्रदत्तम्। केनचित् तस्यै चरणरागोपयोगी सुन्दरलाक्षारसः पुरस्कृतः। सुन्दरकिसलयप्रतिस्पर्धिभिः आपर्वोत्थितैः वनदेवताकरतलैः केनचित्तरुणाऽभूषणानि समर्पितानि।

कालिदासेन पशुसम्पत्तेर्वृक्षसम्पत्तेश्चातिरिक्ता कृषिरप्यार्थिकाय–साधनेषु सर्वप्रमुखसाधनरूपेण गृहीता। तेन विविधप्रकाराणामन्नसम्पदां[11] निर्देशः कृतः। तदानीं यव[12]धान्ये[13]क्षु[14]तिलादीनामपि कृषिरभवत्।

स्पष्टमेतद्यत् नदीनां समीपे कृषिः विशेषरूपेणाभवत्। नदीसलिलसंयोगेन मृत्तिकायां विशेषरूपेणोर्वरता जायते स्म। अतएव पञ्चनदोत्तरप्रदेशोच्चभूमौ यवगोधूमयोरुत्पत्तिरभवत्। विहारस्य बंगप्रदेशस्य च समतलभूमौ धान्यकृषिः सम्पन्नाऽसीत्। कालिदासेन धान्य[15]स्य शालिकलम[16]नीवारा[17]दिकतिपयभेदाः निर्दिष्टाः। इक्षोः गुड[18]शर्करासिताखण्डादिपदार्थाः निर्मीयन्ते स्म। कविना मेघदूते मालवप्रदेशे[19] तत्कालकृष्टक्षेत्रेभ्यो निर्गच्छतो मधुरगन्धस्य कृतं वर्णनं न केवलं काव्यात्मकमेवापितु तदार्थिकदृष्ट्या ततोऽपि विशिष्टाय कृषिमहत्त्वाय प्रभवति।

कालिदासवर्णनैः एवं प्रतीयते यत् बंगब्रह्मदेशयोस्तथान्यत्रापि क्वचित् कार्त्तिकादारभ्य पौषमासं यावत् सस्यानामाग्रहायणी कृषिः समाप्ताभवत्। ऋतुसंहारे ऋतूनां यद् वर्णनं कविना कृतम्, तेन ज्ञायते यत् बंगप्रदेशे इतः पूर्वमपि आषाढादारभ्य भाद्रपदमासं यावत् समाप्यो धान्यविशेषोऽजायत। कविः शरद्वर्णने पुष्पितानां कासानां शालीनाञ्च चित्रणं कुर्वन् कथयति –

**काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या।**
**आपक्वशालिरुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या।।**

– ऋतु० ३।१

**आकम्पयन् फलभरानतशालिजालान्यानर्त्तयन् तरुवरान् कुसुमावनम्रान्।**
**उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन् यूनां मनश्चलयति प्रसभं नभस्वान्।**

– ऋतु० ३।१०



एवंप्रकारेण महाकविकालिदासेन कृष्या आर्थिकमहत्त्वं प्रदत्तम्। एतस्मिन्नेव संदर्भे सः कृषिसहायकानां निर्देशं न विस्मृतवान्। अनड्वाहः[20] क्षेत्रोत्कषण उपयुज्यन्ते स्म। तेषामुपयोगिता भारवहनायाऽप्यासीत्। भारवहनकर्तृषु पशुषु वृषभोष्ट्र[21]वामीना[22]मन्येषाञ्च संकेतः कृतो वर्त्तते। पर्वतानां गोचरभूमिषु[23] चरणशीलानां मेषाणा[24]मपि व्यक्ति–समाजसम्पत्सु गणनाऽऽसीत्। कृषेरन्योपकरणहल[25]स्यापि निर्देशः कविरचनासु लभ्यते। ग्रासक्षेत्रेषु पशवः चरन्ति स्म। अतएवोर्वरभूम्या सहैव तेषां क्षेत्राणामप्यार्थिकमूल्यमासीत्। देशस्याधिकांशजनानां व्यवसायः कृषिरासीत्। गुप्तकालस्यार्थिकेतिहासावलोकनेनापि कृषौ तद्व्यवस्थायाञ्च प्रकाश आपतति। कृषकाः शासकाय धराषष्ठांशं[26] करं ददति स्म। यदि ते कस्मादपि कारणवशात् निरन्तरं वर्षत्रयं यावत् भूमिकरदानेऽसमर्था अभूवन् तदा ते भूम्यधिकारवञ्चिताः जायन्ते स्म। राजसभाया अधिकार आसीत् यत्सा तादृग्भूमिविक्रयं[27] कुर्यात्। एतादृशी भूमिः वन्ध्या भूमिः कथिता वर्त्तते। भूमिं धार्मिकजनाः क्रीत्वा मन्दिराय धर्मशालायै वा तां यच्छन्ति स्म। एतत्तथ्यस्य समर्थनं गुप्तकालीन–ताम्रपत्रेणापि[28] भवति। ऐतेषु ताम्रपत्रेषु वन्ध्यभूमिविक्रयस्य चर्चा विद्यते। विक्रये समस्तभूमिरेकत्र न दीयते स्म, परन्तु विभिन्नस्थानस्थितलघु–भूभागेभ्यो दान[29]मभवत्। स्पष्टमेतद्यत् वन्ध्यभूमिभागे राज्ञः स्वामित्वमासीत्। बंगप्रदेशात् गुप्तानां यानि ताम्रपत्राणि प्राप्तानि, तेष्वपि भूमिसम्पादनस्य संकेतोऽस्ति[30]। भूमिक्रेतृभ्यो विषयपतेः महत्तरस्य वा कार्यालये आवेदनपत्रदानमावश्यकमासीत्, यस्य सीम्नि सा भूमिः स्थिताऽभवत्, तस्य स्थानस्य प्रतिपुस्तपालः तन्निवेदनपत्रं शासनसमक्षं प्रेषयति स्म। राजाज्ञानुसारं तद्भूमिनिरीक्षणाधिकारः महत्तराय समर्पितोऽभवत्। नगरसीम्नि स्थितायां तस्यां भूमौ नगराधिकारिणा तस्याः सम्पादनमभवत्[31]। ग्रामान्तर्गतायाञ्च तस्यां तस्याः सम्पादकः महत्तरोऽभवत्। एवं भूमिव्यवस्थासंकेतः गुप्तकालपरिप्रेक्ष्ये कालिदासग्रन्थैः लभ्यते।

कालिदासस्याभिज्ञानशाकुन्तलेन सेचनव्यवस्थायामपि प्रकाश आपतति। अभिज्ञानशाकुन्तले कूपकुल्यातडागादीनामपि[32] कृषिसेचनप्रसङ्गे चर्चायाति। कृषिभूमिसेचनातिरिक्तं महाकविकालिदासेन वाणिज्य–

व्यवसायकर्मणोरपि विश्लेषणमार्थिकदृष्ट्या कृतम्। कविना धातु[33]–मत्स्यधीवर[34]–बन्धन[35]–व्याध[36]–सैनिक[37]–तन्तुवाय[38]–पौरोहित्य[39]कर्मणां तथा च वनेचर[40]स्वर्णकारव्यवसाययोरपि निर्देशो विहितः।

भारतस्य व्यापारोऽन्यदेशैः सहाप्यासीत्। जावा–श्याम–कम्बोडियादेशैः सहापि व्यापारसम्बन्ध आसीत्। महाकविकालिदासेन रघुवंशमहाकाव्यस्य निम्नाङ्कितश्लोके पूर्वीयदेशानां व्यापारो निर्दिष्टः।

**अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु।**
**द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः।।**
**– रघुवंशम् ६।५७**

उल्लिखितपद्येनैवं प्रतीतिर्भवति यत् भारतस्य व्यापारिकसम्बन्धः पूर्वदक्षिणदेशेभ्यः सहाभवत्। पूर्वीयसमुद्रे भारतीयवणिग्भिः स्वात्यधिकप्रभावः स्थापितः। ते जलमार्गेण प्रायोद्वीपे, द्वीपसमूहे, चीनदेशे च गच्छन्ति स्म। कालिदासेन चीनदेशीयकौशेयवस्त्रस्य प्रचारोल्लेखः कृतः। एवं पूर्वदेशेषु सद्वीपसमूहचीनदेशेन[41] सह भारतस्य व्यापारिकसम्बन्ध आसीत्।

कालिदासस्य ग्रन्थैः जलमार्गीयव्यापारोऽपि प्रमाणीक्रियते। गुप्तकालीनः चीनीयात्री फाहियानः स्वान्तिमयात्रायां ताम्रलिप्तिं सिंहलं सुमात्रां तथा च चीनमपि जलपोतेन गतवान्। तेन वर्णितम्–'पुनरहं वणिजां बृहत्पोतमेकमारूढवान्। समुद्रे दक्षिणपश्चिमदिशोः यात्रां कृतवान्। तस्मिन् पोते शतद्वयाधिका जनसंख्यासीत्। पृष्ठभागे जलपोतस्यैका लघुनौका समुद्रयात्रायाः क्षतिरक्षार्थं बद्धासीत्''[42]।

नात्र संदेहो यत्कालिदाससमये पोतनिर्माणकला पूर्णविकसिताऽऽसीत्......। पोतसञ्चालनेऽपि भारतीयजनाः निपुणा आसन्। महाकविकालिदासेनैकः बंगनिवासी धनमित्रनामा नाविकः पोतकलानिपुणो वर्णितः। कविना व्यलेखि–

**बंगानुत्खाय तरसा नेता नौसाधनोद्यतान्।**
**निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः।।**
**– रघु ४।३६**



कालिदासस्यान्यैरप्युल्लेखैः जलीयव्यापारे पोतकलाविकासे च प्रकाश आपतति। रघुवंशमहाकाव्यस्य सप्तदशे सर्गे, एकाशीतितमे श्लोके **'शिवजलपथः कर्मणे नौचराणाम्'** द्वारेण पोतसञ्चालन–कला–नैपुण्यस्य स्पष्ट उल्लेखः कृतो लभ्यते। अभिज्ञानशाकुन्तले समुद्रव्यापारं कुर्वतो धनमित्रसार्थवाहस्य पोतभङ्गोल्लेखः पोतकला[43]परिचयं व्यनक्ति। डा० कुमारस्वामिमते गुप्तानां साम्राज्यकालो भारतीयनिर्माणकलायाः महत्तमः युग आसीत्। तदानीं भारतवर्षात् पूर्वस्यां दिशि जावा–चीन–बोर्नियो–सुमात्रा–कम्बोडियादेशैः सह तथा पश्चिमदिशि फारसारबाभ्यां साकं व्यापारिकौपनिवेशिकसम्बन्धावास्ताम्[44]।

रघुवंशमहाकाव्यस्य त्रयोदशसर्गीयप्रथमसप्तदशश्लोकेषु सामुद्रिकयात्रायाः वर्णनं निःसंदिग्धम्। षष्ठसर्गस्य सप्तमे श्लोके प्रयुक्तो द्वीपान्तरवाक्यांशः द्वीपान्तरसूचनां ददाति। तेन हि जावा– सुमात्रयोरेव ग्रहणं भवति। एतत्कथनस्य पुष्टिः जावायाः **'बोरोबुदुर'**– मन्दिरस्थैः चित्रैरपि जायते। अत्र विशालजलपोतानां यात्रा–सम्बन्धि–चित्रमप्यङ्कितमस्ति। कालिदासेन रघुवंशस्य षोडशे सर्गे नौविमानशब्दस्य प्रयोगः[45] कृतः। एतेन चन्द्रवितानाकाराः बृहत्तमाभिः नौकाभिः सह चलन्त्यः ताः नौकाः प्रतीयन्ते याभिः पोतभङ्गकाले नौकानां वस्तुजातानां च रक्षाभवत्। एवंप्रकारेण कालिदासोल्लेखैः पोतेन क्रियमाणाः व्यापाराः समर्थ्यन्ते।

मालविकाग्निमित्रस्य[46] विवरणैः ज्ञायते यद्देशस्यान्तर्व्यापारः नितान्तसमृद्ध आसीत्। मार्गे वञ्चकानां भीतिरासीत्। कदाचित् वणिग्जनाः प्रतार्य्यन्ते स्म, किन्तु स्थलमार्गेण क्रियमाणवाणिज्यस्थितिः सुदृढाभवत्। शताधिकाः सार्थवाहाः सहैव व्यापारार्थं प्रयान्ति स्म। ते विविधसामग्रीणां क्रयविक्रययोः संलग्ना अभवन्।

कालिदासीयकाव्यैः वाणिज्य–व्यापार–सम्बन्ध्यनेकवार्त्तानां ज्ञानं भवति। कलिङ्ग[47]–अङ्ग[48]–कामरूप[49]–प्रदेशेभ्यो हीरक–मुक्ता–शङ्ख–शुक्ति–प्रवालैर्निर्मितवस्तूनि प्रदेशान्तरेषु प्राप्यन्ते स्म। नगरे हाटकानि क्रेतृभिः पूर्णान्यभवन्। क्रयार्थे कविना निष्क्रय[50]शब्दः प्रयुक्तः।

राजपथस्योभयो[51] भागयोरापणा आसन्, येषु क्रेतृणां संमर्दः स्थितोऽभवत्। हाटकमार्गः कविना पण[52] मार्गः कथितः। खाद्यपदार्थेषु गुडसितानिर्मितपदार्थाः हाटकेषूपलभ्यन्ते स्म। कालिदासेन निम्नलिखितश्लोके व्यापारिणां दलानां तत्कार्याणाञ्च प्रशंसात्मकशब्देषु वर्णनं कृतम्–

**वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव।**
**सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु।।**

**–रघुवंशम् १७।६४**

वणिग्दलः पर्वतमार्गैः निर्बाधं गच्छति स्म। नद्यः तस्मै गृहवापी–सदृशाः सहजलङ्घ्याः आसन्। अरण्यानी तस्मै गृहोद्यानसदृश्यासीत्। स्पष्टमेतद्यत् कालिदासो वाणिज्यमर्थदृष्ट्या विशेषमहत्त्वं दत्तवान्।

वाणिज्यसमृद्ध्यै मुद्राविनिमय आवश्यक आसीत्। कालिदासेन मुद्राणां निर्देशः कृतः। **'अर्थजातस्य[53] गणना'** पदद्वारेणार्थसमृद्धौ मुद्राणां महत्त्वं प्रदर्शितम्। वरतन्तुशिष्यः कौत्सः गुरुदक्षिणादानार्थं रघोः स्वर्णमुद्राणां याचनां कृतवान्। चतुर्दशकोटिमुद्राभिः गुरुदक्षिणादानार्थं स रघुसमीपे[54] पदार्पणं कृतवान्। तदानीं स्वर्ण–निष्क–प्रधानाः प्रचलितमुद्राः प्रचलिता आसन्। मालविकाग्निमित्रे **'शतसुवर्णपरिमाणा[55]'**–पदमायातमस्ति, यस्यार्थः शतस्वर्णमुद्रात्मकोऽस्ति। अत्र सुवर्णशब्दः मुद्रार्थे व्यवहृतो वर्त्तते। वाणिज्यव्यवसायोन्नत्यै मुद्राणां मापतुलानां परमावश्यकता भवति। कालिदासेनानेकस्थलेषु तुलानां[56] तुलामाप[57] दण्डानाञ्चोल्लेखः कृतः। एवंप्रकारेण मुद्रारूपेण मूल्यानि दीयन्ते स्म। एवं विक्रय्यतरलपदार्था अपि तुलया तोलयित्वा विक्रीता अभूवन्। वस्त्रसदृशाः मापयोग्याः पदार्थाः मापयित्वा विक्रीयन्ते स्म।

आयान्यसाधनेषु खनिजारण्यपदार्था अपि सम्मिलिता आसन्। खनेस्तदुद्गतवस्तूनाञ्च संदर्भेण ज्ञायते यत् खननक्रिया विस्तृतरूपेणाभवत्। बहुमूल्यखननेन पाषाणादिपदार्थाः निःसृताः अभूवन्। कविना मणीनां नामाङ्कनेषु हीरक[58]–पद्मराग[59]–पुष्पराग[60]–महानील[61]–मरकत[62]– वैडूर्य[63]–स्फटिक[64]–मणिशिला[65]–सूर्यकान्त[66]–चन्द्रकान्तानां[67] खनिज– पदार्थानां गणनासु च स्वर्ण[68]–स्वर्णधूलि[69]–रजत[70]–ताम्र–लौह–मनःशिला– गैरिक[71]–सिन्दूर[72]–शैलेया[73] दीनां संकेतः कृतः।



आर्थिकदृष्ट्या खनिजपदार्थानां यावन्महत्त्वमस्ति, तावदेव समुद्रतलात् प्राप्यपदार्थानामपि। मुक्ता[74] तिरिक्त–शङ्ख[75]–शुक्ति[76]–विद्रुमादिपदार्थाः समुद्रतलादुपलभ्यन्ते स्म।

महाकविकालिदासेन समृद्धाटवीभ्यः विशालारण्येभ्यश्च प्राप्यपदार्थानां महत्त्वं प्रदर्शितम्।[77] कलिङ्गस्य कामरूपस्य चारण्यानीभ्यः गजाः गृह्यन्ते स्म[78]। सम्राड्भिः स्वसैन्यशक्तिसंवर्द्धनाय वनेभ्यो गजग्रहणं क्रियते स्म। अतएव महाकविकालिदासेनाखेटप्राणिषु गजानामुल्लेखो नाकारि। स गजाखेटं प्रतिषिद्धममन्यत। दृश्यताम्–

**नृपतेः प्रतिषिद्धमेव तत्कृतवान् पङ्क्तिरथो विलङ्घ्य यत्।**
**अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजो निमीलताः।।**

**– रघु० ९।७४**

गजानामाखेटः शास्त्रनिषिद्धोऽस्ति। अतएव दशरथेन यो गजाखेटः कृतः स विद्वत्सम्मतो नास्ति। कदाचित् विज्ञा अपि शास्त्रविरुद्धं कर्मावेशवशाः कुर्वते।

अरण्येभ्यो गृहनिर्माणाय बृहत्तरव इन्धनानि च ज्वलनकार्यार्थं प्राप्यन्ते स्म। एतदतिरिक्तस्य नारीणामङ्गरागस्य कृते लाक्षारसस्य, यज्ञादिकार्यस्य कृते कृष्णसारमृगचर्मणः, राज्यत्वचिह्नाय चमरीकेशजालस्य, गृहोपकरणाय सालवृक्षस्यान्यवृक्षेभ्य एलालवङ्गकृष्णागरुचन्दनादि–पदार्थस्य च प्राप्तिरभवत्।

कविकालिदासदृष्टावर्थस्य महत्त्वं वितरणकृत एवासीत्। धनसञ्चयः जनतासु सम्मानसत्कारप्राप्त्यर्थमेव क्रियते। कविः कथयति–

**कोशेनाश्रयणीयत्वमिति तस्यार्थसंग्रहः।**
**अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते।।**

**– रघु० १७।६०**

अर्थात् धनसञ्चयः सम्मानार्थं क्रियते स्म। अथापि धनसंग्रहेऽर्थिनामाश्रयग्रहणमुद्देश्यभूतमासीत्। धनहीनव्यक्तीनां जीवनं व्यर्थमस्ति।

निर्धनसमीपं कोऽपि न गच्छति। चातकोऽपि सजलमेव मेघं याचते। कविनार्थप्राप्तेः समस्तसाधनानि पद्यांश एकस्मिन्नेवानुस्यूतानि।

**खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान् ।**

**– रघु० १७।६३**

स्पष्टमेतद्यत् खनिभ्यो रत्नानि, क्षेत्रेभ्योऽन्नानि, वनेभ्यो गजा एवं च भवननिर्माणोपकरणानि लभ्यन्ते स्म।

कविदृष्टौ यस्य धनस्योपभोगो न क्रियते तन्मृतं धनमस्ति। यथा जलं भूमौ पतितं तामुर्वरां समृद्धां च करोति तथैव वितरितस्य धनस्योपयागिता वर्त्तते। कवेः निम्नाङ्कितेन श्लोकेनैष एवाभिप्रायः व्यज्यते। धनस्य वास्तविकोपयोगः वितरणमेव विद्यते। मेघः समुद्रात्पयोऽवाप्य स्वयं न रक्षति, प्रत्युत वर्षाभिः दत्त्वा, पुनरपि सागरात् प्राप्नोति। एवमेवार्थो व्यापारे प्रयुज्यते। तदैव स उपयोगी भवति–

**सन्तस्तस्याभिगमनादत्यर्थं महतः कृशाः।**
**उदधेरिव जीमूतः प्रापुर्दातृत्वमर्थिनः।।**

**– रघु० १७।७२**

अर्जनेऽपि कविर्धर्मनीत्यै एव वैशिष्ट्यं ददाति। स **"सोऽर्थेन सदृशस्त्रिषु"**–रघुवंशम् १७।५७ इति श्लोकं विरचयन्ननीतिविरोधं कृतवान्। नीतिपूर्वकमर्थार्जनं समाजहितेषु तद्वितरणञ्च कालिदासीयार्थनीतेर्लक्ष्यमस्ति।

**सन्दर्भसूची**


1. **न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम्।**
   – कालिदासग्रन्थावली, प्रथमसंस्करणम्, रघुवंशम् २।६३
2. **महोदग्राः ककुद्मन्तः........................।**
   – रघुवंशम् ४।२२
3. **अथोष्ट्रवामीशत......................।**
   – रघुवंशम् ५।३२





4. **जयसेना–देव, कुमारी वसुलच्छी कन्दुअंअणु धावन्दी पिंगलवाणरेण बलीअं वित्तासिदा अंकणिसण्णा देवीए पवादकिसलअं विअं वेवमाणा ण किंपि पकिदिं पडिवज्जइ।**
   –मालविका० चौखम्बा, विक्रमसंवत् २००८, अङ्कः ४, पृ० १६०
5. **वन्यान्विनेष्यन्निव दुष्टसत्त्वान्।** – रघुवंशम् २।८
6. **केसरिणं ददर्श..........।** – रघुवंशम् २।२६
7. **सपल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखवर्हिणानि।**
   **ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन्।।**
   – रघुवंशम् २।१७
8. **गाहन्तां महिषा..............।** – अभिज्ञानशाकुन्तलम् २।६
9. **प्रकामविस्तारफलं हरिण्यः।** – रघुवंशम् २।११
10. **कृष्णसारे ददच्चक्षुः................।** – अभि० १।६
11. **सस्यानामिव सम्पदः।** –रघुवंशम् १०,५६ तथा
    **क्षेत्रैः सस्यम्।** – रघुवंशम् १७।६६
12. **यवाङ्कुरा** – रघुवंशम् १२।४६
13. **शालिगोप्यः,** – रघुवंशम् ४।२६ तथा
    **कलमा इव।** –रघुवंशम् ४।३७
14. **इक्षुच्छाया** – रघुवंश ४।२० तथा ऋतुसंहारम् ५।१
15. रघुवंशम् ४।२०
16. रघुवंशम् ४।३७
17. **निवाराः शुकगर्भ.............।** अभि० १।१४
18. **प्रचुरगुडविकारः स्वादुशालीक्षुरम्यः।** – ऋतुसंहारम् ५।१६
19. **सद्यः सीरीत्कषणसुरभिक्षेत्रमारुह्य मालम्।'** –पूर्वमेघः १६
20. रघुवंशम् ४।२२
21. तदेव ५।३२
22. तदेव
23. रघुवंशम् ४।२२
24. रघुवंशम् १६।२
25. पूर्वमेघः १६।

26. **षडंशभाक्**–रघु० १७।६५
27. मजूमदारः Corporate life in Ancient India, P. 161.
28. दामोदरपुरताम्रपत्रम्–Epigraphic India, Vol. 15, P. 130.
29. दामोदरपुरताम्रपत्रम्–संख्या ५
30. दामोदरपुरताम्रपत्रम्–Epigraphic Indica, vol. 15, P. 130.
31. गुप्तसाम्राज्य का इतिहास, द्वितीय खण्ड (इलाहाबाद १९३९) पृ० २३–२४।
32. शाकुन्तलम् १।१५
33. **शिल्पमात्र...................................धातुः**–मालविकाग्निमित्रम् १।१६
34. **'शुणध दाणिं हगे शककावदालव्भं...मालविकाग्नितरालवाशी धीवलो।'**
    – शाकु० षष्ठाङ्कः, प्रारम्भिकगद्यम्।
35. **अहके जालुग्गालादिहिं मच्छबंधपाएहिं कुडुम्बलमणं कलेमि।**
    – शाकु० षष्ठाङ्कः, प्रारम्भिकगद्यम्।
36. **तदो महन्ते एव्व पच्चूसे दासीए पुत्तेहिं सउणिलुद्धएहिं वणग्गहण कोलाहलेण पडिबोंधिदो म्हि–**
    – शाकु० प्रारम्भिकगद्यम्, विदूषकोक्तिः
37. कृतास्त्रः सांपरायिकः.........................। – रघुवंशकाव्यम् १७।६२
38. **अथास्य रत्नग्रथितोत्तरीयमेकान्तपाण्डुस्तनलम्बिहारम्। निःश्वासहार्यांशुकमाजगाम धर्मः प्रियावेषमिवोपदेष्टुम्।**
    – रघुवंशम् १६।४३
39. **शहजे किल जे विणिन्दिए णहुदे कम्मविविज्जणीऊए। पशुमालणकम्मदालुणे ऊणकम्पमिदु एव्व शोत्तिए ।।**
    – शाकुन्तलम् ६।१
40. **आउंल्लप देशे वणचरवुत्तिणा तए होदव्वं।**
    – अभि० द्वितीयाङ्कः प्रार० विदू०
41. **चिनांशुकमिव केतोः प्रतिवातं नीयमानस्य।।** –अभि० १।३२। तथा **संतानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालम्।**
    – कुमार० ७।३



42. फाहियान का यात्रा–विवरण। – पृ० ८० तथा ६१।
43. अभि० शा०–षष्ठाङ्के द्वाविंशतितमश्लोकानन्तरम्।
44. Arts & Crobts in India, p. 166.
45. रघुवंशम् १६।६८
46. मालविकाग्निमित्रम्–पञ्चमाङ्कः
47. रघु० ४।४०, ६।५४
48. रघु० ६।२७
49. रघु० ४।८३
50. रघु० २।५५
51. **ऋद्धापणं राजपथम्** –रघु० १४।३०
52. कुमारसम्भवम् ७।५५
53. अभि० शा०, कालिदासग्रन्थावली, प्रथमसंस्करणम्, पृ० २१६।
54. **वित्तस्य विद्यापरिसंख्यया मे, कोटीश्चतस्रो दश चाहरेति।**
    –रघु० ५।२१
55. मालविकाग्निमित्रम्।
56. रघुवंशम् ८।१५
57. कुमारसम्भवम् १।१
58. **वज्रांशुगर्भाङ्गलरन्ध्रमेकम्।** –रघु० ६।१९
59. **रश्मिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति।**
    –रघु० १३।५३
60. **तस्य प्रभानिर्जितपुष्परागम्।** –रघु० १८।३२
61. **मणौ महानील.........................।** –रघु० १८।४२
62. **मरकतमणिभासा वारणाभूषितानाम्।** –ऋतु० ३।२१
63. **विदूरभूमिर्नवमेघशब्दान्।** –कुमार० १।२४
64. **भङ्गिरचितस्फटिकेन रामः।** –रघु० १३।६६
65. **बृहन्मणिशिलाशालम्।** –कुमार० ६।३८
66. **भास्करात्सूर्यकान्त इव ताडकान्तकः।** –रघु० ११।२१
67. **व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः।** –उत्तरमेघः ७

68. ऋतु० ६।१७–१८
69. रघु० १४।३३
70. रघु २।८०
71. रघु० ५।७२। एवं च ४।७१
72. ऋतु० १।२४
73. रघु० ६।५१
74. रघुवंशम् १३।१७
75. रघु० १४।१३, ऋतु० ३।४
76. रघु० १३।१७, मालविका० १।६
77. कुमार० १।४४, रघु० ६।१६
78. रघु० ४।४०

**(हरप्रसाददास जैनकालेज, आरानगरस्य संस्कृत–प्राकृत–विभागपक्षतः प्रकाशितस्य 'मागधम्' इति शोधपत्रस्य दिसम्बर, १९९६ अङ्कात् साभारम् उद्धृतोऽयं लेखः)**

**– सम्पादकः**

* * *



# कालिदासस्य जीवनदर्शनम्*

डॉ० श्री नेमिचन्द्र शास्त्री

कालिदासो भारतीयसाहित्यस्य स्थायी कविरस्ति। तस्य काव्य–सौष्ठवं शाश्वतमस्ति। यद्यपि कालिदासेन या समाजव्यवस्था निरूपिता, सा नष्टप्राया विद्यते, तथापि तस्य स्थायिसाहित्यमेतादृशकाव्यमूल्यानि स्थापयति, यानि देशकालयोः सीमानमतिक्रान्तानि सन्ति। महाकविकालिदासेन काव्यनाटकानि प्रणीय जीवनस्य शाश्वतसमस्यानां समाधानं विहितम्। तेन प्रणयकर्त्तव्ययोः, स्वार्थपरमार्थयोः, धर्मार्थयोश्च संघर्षमपनीय मञ्जुलसमन्वयोपस्थापनं कृतम्। स भारतीय–संस्कृतेरमरगायकोऽस्ति। तस्याः विशुद्धरूपस्य प्रदर्शनमेव तस्य कलायाः पूर्णाभिव्यक्तिरस्ति। भारतीयसंस्कृतिः धर्मादिपुरुषार्थत्रय–समसेवनाग्रहवती[1] वर्त्तते। अतएव कविकालिदासेन मनुष्यचित्तवृत्तीनां नानापरिस्थितिमध्ये चित्रणमकारि। स हि कविरभिज्ञानशाकुन्तले श्रेयसः प्रेयसश्च परस्परसंघर्षस्य नितान्तमुदात्तचरित्रं चित्रितवान्। अभिज्ञान–शाकुन्तले शकुन्तला शक्तिद्वयेनाकृष्यते। एकशक्त्याः प्रतिनिधिर्दुर्वासाः वर्त्तते। द्वितीयायाश्च प्रतिनिधिर्दुष्यन्तोऽस्ति। दुर्वासा आध्यात्मिकतायाः प्रतीकमस्ति। स च बलपूर्वकं स्वास्तित्वं सूचयन् भारतश्रिय–स्स्वाभिमुखीकरोति। ताश्च स्वरक्षायै उपदिशति। स हि श्रेयसः प्रतीकमस्ति। भारतस्य सार्वभौमो राजा दुष्यन्तो भोगविलासस्य भौतिकवादस्य वावतारो विद्यते। सः प्रच्छन्नतस्करसदृशः शान्ताश्रमे प्रविशति तथा स्वप्रलोभनैस्तमशुद्धमशान्तं च विदधाति। स हि प्रेयसः प्रतीकमिति निर्विवादम्। अतः शाकुन्तलनाटके श्रेयःप्रेयसोः संघर्षः प्रदर्शितोऽस्ति। शकुन्तला उपस्थितं श्रेयसं तिरस्कृत्यानुपस्थितं दूरस्थं प्रेयसमङ्गीकरोति तत्परिणामञ्च गृह्णाति दुष्यन्तराजप्रासादादबहिष्कार–

स्वरूपम्। सा पुनः मारीचाश्रमे स्वमातुः मेनकायाः समीपे, ऋषितत्त्वावधाने, घोरं तपश्चरति। स्वकालुष्यञ्चापनयति। स्वार्थं परमार्थवेद्यामर्पयति। स्वप्रेम श्रेयोऽनुकूलं **विधाय** तेन पूर्णसामञ्जस्यं स्थापयति। तदा सा जीवनं धन्यं **मनुते वृणोति** च शाश्वतं सौख्यं शान्तिञ्च। महाकविकालिदासस्य **एतदेव** जीवनदर्शनम्। स जीवने विश्वकल्याणाय महत्त्वं ददाति। वस्तुतो**ऽनियन्त्रित**जीवनं भारस्वरूपमस्ति। एतादृशञ्च जीवनं व्यक्तिसमाजोभयकृतेऽहितकरं भवति।

कालिदासदृष्ट्यां नैराश्यवादो गर्हितोऽस्ति। स वर्त्तमानजीवनं साधनायाः श्रेयसश्च कारणं मनुते। स उक्तवान् यद्देहिने मरणमेव प्रकृतिः। जीवनन्तु विकृतिमात्रमस्ति। यदि प्राणी श्वसन् क्षणमात्रमपि जीवति, तदैतदेव तत्कृते लाभस्वरूपमस्ति–

**मरणं प्रकृतिः शरीरिणाम्..................... ।**

– रघुवंशम् ८।८७

कालिदासो वैयक्तिकोन्नत्यपेक्षया सामाजिकोन्नतेः पक्षपात्यस्ति। तस्य समाजः श्रुतिस्मृत्यनुकूलो निर्मितोऽस्ति। सः त्यागाय धनसंग्रहं करोति। कालिदासदृष्टौ विजयलालसा प्राणिनः राष्ट्राणि च पददलितानि कर्त्तुं नास्ति। कालिदासेन चित्रिताः नरपतयः भारतीयसमाजेऽनुकरणीय–मादर्शं समुपस्थापयन्ति। सः आदर्शसमाजस्य कल्पनामादर्शव्यक्ति–त्वाधारे कृतवान्। तथाहि–

**'त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।'**

– रघुवंशम् १।७–८

कालिदासस्य जीवनदर्शनं यज्ञाध्ययनदानेष्वाश्रितमस्ति। कविरेतत्त्रयाणां महत्त्वेन सह जीवनशोधनार्थं तपोऽपि परमावश्यकं मनुते। स दानगौरवगाथां गायन् रघुवंशपञ्चमसर्गेऽद्भुतादर्शमुप–स्थापितवान्। वरतन्तुशिष्यः कौत्सः गुरुदक्षिणायै तदा रघुसमीपमागच्छत्, यदा स स्वीयां समस्तां सञ्चितसम्पत्तिं यज्ञेऽददात्। रघुरलकापुरीमाक्रम्य यक्षराजकुवेराद्धनं प्राप्तुमुद्योगं कृतवान्।



एतस्मिन्नेव काले कोषे स्वर्णवृष्टिरभवत्। एकत्र राज्ञः आग्रह आसीत् सम्पूर्णधनग्रहणाय शिष्यं प्रति। अन्यत्र शिष्यस्याग्रह आसीत् यत् स्वकार्यादधिकमेकं कपर्दकमपि न स्पृशेत्। दातुः ग्रहीतुश्चैष आग्रहः परमाश्चर्यजनकं वस्त्वस्ति। जीवनस्यैतदेव तथ्यं कालिदासस्य जीवनदर्शनमस्ति। आवश्यकतानुसारं ग्रहणन्ततोऽधिकस्य च परित्यागः समाजकल्याणस्य महनीयसूत्रमस्ति। वस्तुतः कालिदासेनैतस्मिन् कौत्साख्याने स्वजीवनदर्शनस्य सारो निहितः।

मनुष्यस्तपसा स्वसमस्तकामनानां पूर्त्तिमेव न करोति प्रत्युत परोपकारयोग्यतामपि सम्पादयति। कालिदासो जीवनशुद्ध्यै पश्चात्तापं तपस्याञ्चावश्यकीं मनुते। तस्य मदनदहनरहस्यमप्येतन्मूलकमेवास्ति। मदनः पार्वत्याः कमनीयरूपमाश्रित्य समाधिनिरतशंकरस्य हृदयाघातं समीहते। प्रकृतौ वसन्तागमनं भवति। लता वृक्षोपरि नृत्यन्ती स्वप्रेम प्रकटं करोति। एकस्मिन्नेव कुसुमपात्रे भ्रमरी स्वसहचरेण सह मधु पिबति। व्याधसदृशो मदनः संसारं त्रस्तं कुर्वन्नास्ते। तस्याकाङ्क्षा वर्द्धते। स शङ्करोपर्याक्रमणं करोति। अत्र कालिदासदृष्ट्यां जगत्–कल्याणस्यात्यन्तिकमङ्गलस्य वा प्रतीकमेव शंकरोऽस्ति। विश्वकल्याणं मदनोपासनायां नास्ति, तद्धि तद्दमन एवास्ति। कामः स्वप्रभुतां कामयते। स विश्वकल्याणोपरि स्वमोहनबाणं त्यजति। शंकरश्च स्वतृतीयनेत्रोत्पन्ने–नानलेन मदनं भस्मावशेषं करोति। शंकरस्य तृतीयनेत्रं ज्ञानप्रतीकमस्ति। एतच्च प्रत्येकमनुष्यस्य भ्रूमध्ये विद्यमानमस्ति, परन्तु सुप्ततया तदाभासो न जायते। शंकरस्य तज्ज्ञाननेत्रं प्रबुद्धमस्ति। एतज्ज्ञाननेत्रज्वालायामेव मदनदहनं भवति। कल्याणविरोधी मदनो भस्मसात् भवति। पार्वती शंकरं विश्वकल्याणं वा प्राप्तुं तपश्चरति। एतत्सत्यमस्ति यत्तपो विना, विना च हृदयस्थितदुर्वासनाविनाशं कल्याणभावनाप्राप्तिरलभ्यास्ति। महाकविकालिदासेनैतस्यैव जीवनदर्शनस्य सर्वत्राभिव्यञ्जना कृता। जगत्कल्याणं वासनासु नियन्त्रितास्वेव सम्भवमस्ति। तेन पार्वतीतपोरहस्यमुद्घाटयता व्यलेखि–

**इयेष सा कर्त्तुमवन्ध्यरूपताम्।**

– कुमार० ५।२।

पार्वतीतपःफलमस्ति–तथाविधं प्रेम–अलौकिकमुत्कटकोटिजं प्रेम तथा च तादृशः पतिः–मृत्युञ्जयो महादेवः। पद्येऽस्मिन् रहस्यमेतदस्ति यत् निःस्वार्थसाधनैव विश्वप्रेमोत्पादयितुं क्षमतामावहति। तपस्यया वासनानिरोधेन च जीवनेऽपूर्वशान्तिरुत्पद्यते। मनुष्यः सूर्यकान्तमणिसदृशस्तेजस्वी कोमलश्च जायते। तत्तेजः परेणाभिभूतं न भवति। तिरस्कृतौ च तद्दाहात्मकं भूत्वा तत्स्पर्शानुकूलं विदधाति। अभिज्ञानशाकुन्तले कविरात्मनियन्त्रण–स्यैतदेव तेजो निम्नप्रकारेण निरूपितवान्–

**शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।**
**स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति।**

— :।७

कतिपये विद्वांसः कालिदासस्य जीवनदर्शनं तपस्त्यागतपोवनरूपं स्वीकुर्वन्ति। बहुष्वंशेषु तत्कथनं सत्यमप्यस्ति। परन्त्वेतत्तज्जीवनस्य चरमसत्यं नास्ति। यद्यपि तदीयकाव्येषु तत्कालीनसमाजव्यवस्था पूर्णरूपेण प्रतिबिम्बितास्ति, तथाप्यसौ राज्ञे वृत्तद्वयमावश्यकं मनुते–भोगः संग्रामश्च। यद्यपि कालिदासस्य नृपाः प्रजाप्रसन्नकराः सन्ति तथापीयं पृथ्वी तन्नृपाणां भोगायास्ति, रघुः अजायेमां पृथ्वीमिन्दुमतीतुल्यां समर्पितवान्। दुष्यन्तस्यापि प्रतिज्ञायामेष संकल्पः श्रूयते स्म यत्तस्यानेकराज्ञीसु वर्त्तमानासु तदन्तिके द्वयोरेव प्रतिष्ठासीत्–पृथ्व्याः शकुन्तलायाश्च। अत एतदतिरोहितं यत्कालिदासः सामन्तवादिन्याः व्यवस्थायाः पोषक आसीत्।

किन्त्वसावेकान्तत एतस्याः व्यवस्थायाश्चारणो नाभवत्। तत्साहित्यं तत्कालीनसमाजव्यवस्थां प्रतिविम्बितामकरोत्, तथापि तस्या एको विशालोंऽशः तद्व्यवस्थामुक्तः सन् कल्पनालोकस्य सृष्टिं कुर्वन्नासीत्। अतएव तत्काव्येषु प्रेमतत्त्वैः सह नवजागरणसंदेशोऽपि निबद्धः प्राप्यते। कालिदासः राजवैभवं वर्णयन् प्रकृतिवर्णनेऽप्यात्मतुष्टिं लभते। दुष्यन्तशकुन्तलयोः प्रेम कस्मिन्नपि नगरे नोत्पद्यते, प्रत्युत तपोवने जायते। शिवपार्वत्योरपि प्रेमप्रसूतिः गन्धमादनपर्वतेऽभवत्।

अस्तु, अलका विलासवैभवैर्मण्डिता वर्त्तते। सा च मणिकुट्टिमैः सम्पन्नास्ति। यक्षाणां हर्म्यस्थलानि श्वेतमणिमयानि सन्ति। यक्षबालाः



कनकसिकताप्रक्षेपैः मणीन् प्रच्छन्नान् कुर्वते। पुनस्तदन्वेषणक्रीडां कुर्वन्ति। स्वदुकूलेषु स्रस्तेषु यदा ताः रत्नदीपेषु चूर्णं प्रक्षिपन्ति तदा ते न निर्वाणं गच्छन्ति। तासां सुरतजनिताङ्गक्लान्तिश्चद्रकान्तमणिस्रुतजलबिन्दुभि–रपनीयते। तासां शृङ्गारप्रसाधनानि कल्पवृक्षेभ्यो लभ्यन्ते। यक्षस्य गृहवापीषु स्वर्णकमलानि विकसन्ति। तस्योद्याने चेन्द्रनीलमणिमण्डितः क्रीडाशैलोऽस्ति। तत्र च कनककदलीवेष्टनं प्रेक्षणीयमस्ति। कालिदासस्यैतादृशं चित्रणं प्रेमपूर्णमस्ति। तस्य प्रेमवृत्तिः नरनारीप्रेमवर्णने, प्रकृतिचित्रणे, सूक्ष्मेन्द्रियबोधे तथा च पौराणिकगाथानां सौन्दर्यवादिन्युपयोगे सर्वत्र लक्ष्यते। वस्तुतः प्रेमवाद्यपि कालिदासो जीवने वैयक्तिकप्रेम्ण एव महत्त्वं ददाति। तदीयजीवनदर्शनं प्रेम्णस्तत्पक्षं प्रदर्शयति यस्मिन् प्रेमैकस्मिन् पुरुषे नार्यां चैकस्यामक्षुण्णं तिष्ठति। पुरुषायानेकतरुण्यः स्वयौवनसौन्दर्य्यैः भोग्याः न भवन्ति। प्रत्युत पुरुषः कस्यामपि नार्या–मेकस्यामेव प्रेमाधिकारी वर्त्तते।

कालिदासस्य कतिपये नायकाः अनेकपत्नीभिरुपास्यन्ते। परन्तु प्रेमिकारूपेण तेषां स्नेहं काचनैकैव गृह्णाति। दिलीपस्याप्यनेकपत्न्य आसन्। किन्तु स सुदक्षिणाया एव प्रेम्यासीत् । एतदेव तथ्यं दुष्यन्तेऽपि वर्त्तते। तस्यानेकपात्रेषु बहूनामेकपत्नीत्वमेवास्ति। यक्षस्यालकायां विलासस्यानेकसाधनान्यासन्, किन्त्वनेकसाधनैः सम्पन्नोऽप्यसौ यक्षः स्वप्रियायामेव प्रेम करोति। तस्य प्रियाप्यलकायाः विलासमयवातावरणे पूर्वीयक्षितिजे हिमांशुशेषकलासदृशशय्यायां शयानास्ते। एवमेव शिवपार्वत्योः प्रेमापि जीवनाय प्राप्यमस्ति। इन्दुमतीवियोगावसरेऽजेन योद्गाराभिव्यक्तिः कृता, तया कालिदासीयप्रेमसम्बन्धिनी मान्यता स्पष्टा जायते। जीवनाय प्रेम पाथेयमस्ति। तदभावे जीवनं शुष्कमस्ति। नारी प्रेम्णः सर्वोत्तम आधारोऽस्ति। अजः कथयति–

**गृहिणी सचिवः सखी..................।**

— रघु० ८।६७

अज इन्दुमतीं सर्वस्वां मनुते। तस्मै संसारसार इन्दुमती वर्त्तते। अत एतत्स्पष्टमस्ति यत् कालिदासः प्रेमप्रधानः (रोमाण्टिक) कविः

सन्नपि स प्रेम्ण उत्कृष्टरूपमेव समादृतवान्। यत्र प्रेम्णि कालुष्यमुत्पनं भवति, तत्र वासना प्राधान्यमवाप्नोति, तत्रैव कविः येन केनापि प्रकारेण शापयोजनां करोति। अभिशप्तश्च स्ववासनां परिष्कृतां विधाय विशुद्धं प्रेम प्राप्नोति। एतदेव प्रेम जीवनस्य सर्वस्वमस्ति।

यौवनेन सौन्दर्येण च साकं कालिदासस्य प्रेम्णः घनिष्ठः सम्बन्धोऽस्ति। तस्य जीवनदर्शनस्यायामो भोगवादं यावदेव न सीमितोऽस्ति, प्रत्युतानन्दकामनां यावदस्ति। कविनोक्तं यद्यथा रङ्गारोपेण चित्रं विकसति, तथैव यौवनागमेन नारीसौन्दर्यं विकसति (कुमारसम्भवम् २।३२–३३, कुमार० ५।३५)। कोकिला भामिनीः मानत्यागाय विनयति। यतः यौवनं गतं पुनर्नायाति (रघुवंशम् ८।२२)। कालिदासः सौन्दर्यं लावण्यञ्च पापवृत्तिकारणं नामन्यत। स उक्तवान् यत् सौन्दर्यं पापवृत्तिमूलं नास्ति (कुमारसम्भवम् ५।३६)। कालिदासः सौन्दर्यस्य मूर्त्तिमद्रूपचित्रणे विभिन्नाङ्गानां लावण्यस्य पृथक्–पृथक् विवेचनं करोति। तस्यैतच्चित्रणस्यैका विशेषतास्ति यत्स समग्ररूपस्याभासं दातुमपार्थिवकल्पनालोके विचरणं करोति। स पार्वतीसौन्दर्यचित्रणं **"त्रिलोकसौन्दर्यमिवोदितं वपुः"** उक्त्वा कृतवान् (कुमार ५।४१)। उमाशरीरे त्रैलोक्यसौन्दर्योदयो जातोऽस्ति।

कविकालिदासस्य जीवनदर्शनस्याभिन्नमङ्गं प्रेमसौन्दर्यञ्चास्ति। स सौन्दर्यबोधमूलाधारजीवनं प्रेम एव मनुते। एतज्जीवनं मनुष्ये, पशौ वनस्पतौ च सर्वत्रैवास्ति। विलासवैभवयोरयं कविरस्माकं धराया एतावान् समीपवर्त्ती वर्त्तते यत् प्रत्येकं भौतिकवादि वस्तु स स्पष्टं पश्यति। तस्य दृष्टौ वनलतोद्यानलतयोः सौन्दर्ययोः महत्पार्थक्यमस्ति। शकुन्तलायाः सौन्दर्यं वनलतासदृशमस्ति। तस्याः वपुरव्याजमनोहरमस्ति। वल्कलधारिण्यपि सा परममनोज्ञा लक्ष्यते। तस्याः रूपमनाघ्रातं पुष्पम्, अलूनं किसलयम्, अनाविद्धं रत्नम्, अनास्वादितं नवमधु, अनघमखण्डपुण्यानां फलञ्चास्ति। प्रेमिणः रूपतल्लीनता तामात्मलीनां करोति। प्राकृतिकोपमानैः नारीतुलनां कुर्वन् कालिदासः रूपजन्यानन्दातिरेकस्य व्यञ्जनामपि करोति। आभरणं दधानोमा **नक्षत्रमण्डितत्रियामासदृशी**



प्रतीयते। एवमेव कौशेयवस्त्रावृता सा क्षीरोदवेलेव सफेनपुञ्जा प्रतिभाति (कुमार० ७।२६)। एवंप्रकारेण कविकालिदासः जीवनकृते प्रेमसौन्दर्यञ्चावश्यकममन्यत।

डॉ० वासुदेव शरणाग्रवालेन[२] कालिदासस्य जीवनदर्शनस्य विश्लेषणं कुर्वता व्यलेखि यत् शिवस्वरूपस्य यथार्थज्ञानमेव कालिदासदर्शनसाधनयोः ज्ञानमस्ति। तन्मतमस्ति यत् पार्वती सुषुम्नायाः नामास्ति। हिमालयः मेरुदण्डमस्ति, यस्य मध्ये सुषुम्नास्ति। शिवो मदनं भस्मसात् चकार। तत्पश्चात् पार्वतीतपस्यया सुषुम्नासंयोगेन योगसाधनया शिवपार्वत्योः विवाहः सम्पन्नः। व्यक्तेरधोमुखी चिदात्मकशक्तिरन्तर्मुखी भूत्वा सहस्रदले स्थिता परबिन्दुशिवे संयुक्ता भवति। पुनः विषयेभ्यः तस्याः न काचन भीतिर्जायते।

डॉ० अग्रवालस्येयं व्याख्या कुमारसम्भवस्याध्ययनेनोचिता न प्रतीयते। यतः शिवः पार्वतीतपसाकृष्टः तां स्वशिष्यां सम्पादितवान्। तस्य सा शिष्या योगाभ्यासिनी नास्ति, प्रत्युत सुरताभ्यासिन्यस्ति। कवेरुक्तिरियम्–

**शिष्यतां निधुवनोपदेशिनः शङ्करस्य रहसि प्रपन्नया।**
**शिक्षिते युवतिनैपुण्यं तथा यत्तदेव गुरुदक्षिणीकृतम्।**

– कुमार० ८।१७

स्पष्टमेतद्यत् पार्वतीगुरुः निधुवनोपदेशी वर्त्तते। सा तादृशगुरोः यां शिक्षां गृहीतवती तत्प्रतिफलस्वरूपं तया दक्षिणायां 'युवतिनैपुण्यं' समर्पितम्। अतः स्पष्टमेतद्यत् कालिदासस्य जीवनदर्शनं रहस्यवादि नास्ति।

कालिदासो विश्वं शिवरूपं मनुते। अतस्तत्सहानुभूतिक्षेत्रं व्यापकमस्ति। स मानवजीवनं क्षणभङ्गुरमुक्त्वा वैराग्योपदेशं न ददाति। तद्वर्णितराजसु कियन्तो वृद्धावस्थायां विरक्ताः सन्तः वनशरणं गृह्णन्ति। परन्तु कवेरास्था वैराग्येऽस्मिन्नास्ति। स गृहस्थधर्मे स्थित्वा शिवसाधनां कारयति। स प्रकृतेः मानवस्य च प्राणस्पन्दनं शृणोति तथैतज्जीवनं स्वकलायाः आधारं कलयति। सोऽनेकपौराणिकदेवेषु नान्धविश्वासं करोति।

फलतः पौराणिकगाथानामुपयोगं काव्यचमत्कारकृत एव स कृतवान्। तन्मते गङ्गापि शम्भोरम्भोमयी मूर्तिरस्ति। ब्रह्मा, विष्णुः, महेशश्च 'एकैव मूर्तिर्बिभिदे त्रिधा सा', एकस्या एव मूर्तेः त्रयो भेदाः सन्ति। अतः स्पष्टमेतद्यत् कालिदासो धार्मिकाग्रहमुक्तोऽस्ति।

प्रचलितविश्वासादृते कालिदासो मानवत्वमारोप्य नवरोचकगाथानां कल्पनां करोति। मेघदूतमेतस्य श्रेष्ठमुदाहरणमस्ति। कालिदासो लोकोत्तरकल्पनया सार्धं यथार्थमपि स्वीकरोति। सकलङ्कं चन्द्रमसं वीक्ष्य संस्कृतकवयोऽद्भुतकल्पनाचमत्कारं दर्शितवन्तः, परं कालिदासश्चन्द्रमसि पृथ्व्याश्छायां मत्वा तद्यथार्थाङ्कनं करोति–

**छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः।**

रघुवंशम्–१४।४०

बालचन्द्रमाः सूर्यतेजो गृहीत्वैव वृद्धिं गतो भवति। कविरेतत्तथ्येन सुपरिचितोऽस्ति। अतः स चन्द्रमसश्चित्रणं यथार्थभूमौ स्थित एव करोति। स कथयति–

**पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः।**

कविनाश्वान् वर्णयता तेषां सैन्धवावलेहनक्रियाया अपि निरूपणं कृतम्–

**वक्त्रोष्मणा मलिनयन्ति पुरोगतानि,**
**लेह्यानि सैन्धवशिलाशकलानि वाहाः।**

– रघुवंशम् ५।७३

कविः कल्पनावसरे यथार्थमपि न त्यजति। स महिषान्, जृम्भां कुर्वतो मृगान् मुस्ताक्षतिञ्चरतो वराहान् यथार्थसंवलितकल्पनाचित्रण–विषयान् करोति–

**गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितम्–**
**छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।**
**विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले**
**विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः।**

– अभि० २।६



महाकविकालिदासस्य काव्योत्कर्षः उपमानेभ्यः प्रसिद्धोऽस्ति। सांसारिकविभिन्नवस्तुसाम्यदर्शनसहजक्षमता कालिदासे विद्यामानास्ति। तस्योपमानानामधिकोंऽशः सूक्ष्मेन्द्रियबोधस्य सौन्दर्यग्राहकवृत्तेश्च परिचायकोऽस्ति। अजशोकव्यञ्जनां कुर्वन् कविरुक्तवान् यत् यथा प्लक्षप्ररोहः सौधतलं भित्त्वा नीचैः निःसरति तथैव शोकेनाजहृदयं विद्धम्।

**तस्य प्रसह्य हृदयं किल शोकशङ्कुः**
**प्लक्षप्ररोह इव सौधतलं बिभेद।**

– रघु० ८।९३

अजविजयेन प्रसन्नाया इन्दुमत्याः मुखं स्वच्छदर्पणमिव दीव्यति। स्नाता पार्वती पर्जन्यजलाभिषिक्तप्रफुल्लाकाशवसुधेव प्रतीयते। स्पष्टमेतद्यत् कविनोपमानं प्रकृतेर्गृहीतम्। अत एतत्सुतरामनुमीयते यत् कविः नगरापेक्षया प्रकृतिप्रिय एवाधिको वर्त्तते।

कविकलायाः शृङ्गारः सुकुमारसमवेदनाऽस्ति। एताः समवेदनाः न केवलं वस्तुरूपग्रहणं कुर्वन्ति प्रत्युत तज्जीवनस्पन्दनमपि शृण्वन्ति। तस्य सहानुभूतिः सामन्तव्यवस्थया सामन्तकाव्यपरम्परया वा नास्ति। यद्यपि काव्यरूढावाबद्धेन तेन सामन्तव्यवस्थाया आश्रयो गृहीतः, परन्तु स हृदयेन तस्याः व्यवस्थायाः पोषको नास्ति। तथाहि शारद्वतः दुष्यन्तसमीपे शकुन्तलां त्यक्त्वा गच्छन् ब्रवीति यत्पतेः प्रभुता सर्वतोमुखी वर्त्तते। स पत्नीं गृह्णातु त्यजतु वा। शाङ्र्गरवोऽपि शकुन्तलां पतिगृहे दासी भूत्वा निवासायोपदिशति। परन्तु सामन्तवादविरोधिकविकालिदासः शकुन्तलया दुष्यन्तं भर्त्सितं कारयति। सा कथयति–

**अणज्ज ! अत्तणो हिअआणुमाणेण पेक्खसि। को दाणिं अण्णो धम्मकञ्चुअ अप्पअवेसिणो तिणच्छण्णकूवोवमस्स तव अणुकिदिं पडिवदिस्सदि। (अनार्य, आत्मनो हृदयानुमानेन पश्यसि। क इदानीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते।)**

अपि च–सुट्ठु दाव अत्त सच्छन्दचारिणी किदम्हि, जा अहं इमस्स पुरुवंसप्पच्चएण मुहमहुणो हिअ अट्ठि अविसस्स हत्थब्भासं उवगदा। (सुष्ठु, तावदत्र स्वच्छन्दचारिणी कृतास्मि, याहमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयस्थितविषस्य हस्ताभ्याश–मुपगता।)

कविः सीतामपि यथार्थरूपामुपस्थापितवान्। गर्भवतीं सीतां यदा वने विहाय लक्ष्मणश्चलति तदा सीता रामं राजरूपं स्मरति। रामायातोऽधिका का भर्त्सना भविष्यति। सीता कथयति–

**वाच्यस्त्वया मद्वचनात्स राजा ह्यग्नौ विशुद्धामपि यत्समक्षम्।**
**मां लोकपवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य।।**

– रघु० १४।६१

स्पष्टमेतद्यत् कालिदासः सौन्दर्यवादी भवन्नपि यथार्थदूरे नास्ति। तत्पात्रेषु जीवनस्योभयपक्षयोः समन्वयः प्राप्यते। यौनप्रेम–सौन्दर्येच्छा–वात्सल्यानि च पशुष्वप्युपलब्धानि सन्ति। मानवसमाजे सर्वेषामेतेषां विकासः क्रियते। यदा मानवेषु तेषां ह्रासो भवति, तदा स पशुभ्योऽपि पतितो भवति। कालिदासः स्वग्रन्थेषु सर्वत्रैतत्तथ्यस्य योजनां कृतवान्।. संक्षेपरूपेण कविजीवनदर्शनस्य सारांशो निम्नांकितो वर्त्तते–

**आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्।**

– पूर्वमेघः ५३

**आदानं हि विसर्गाय सतां वारिमुचामिव।**

– रघु० ४।८६

**मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते।**

– रघु० ८।८७

**सरस्वती श्रुतिमहती महीयताम्।**

– अभिज्ञानशाकुन्तलम् ७।३५

**कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।**

– पूर्वमेघः ५



परोपकारः, सम्पत्तेः परोपकारायोपयोगः, उद्दामयौवनागमेऽपि संयमः, विकारहेतावपि विकाररहित्यम्, जीवनस्य महनीयभोगानां भोगकालेऽपि विवेकः, एतान्येव तत्त्वानि जीवस्य लक्ष्यभूतानि सन्ति। प्रेम, सौन्दर्यम्, जीवनस्य भोगोपभोगौ चैतानि न गर्हितानि सन्ति। भोगः प्रेयोऽस्ति, परन्तु श्रेयोमार्गं प्रेमप्राङ्गणत एव निःसरति। कर्मविहितं प्रेम वरेण्यमस्ति। शिवमानसे कामस्यासामयिकः क्षोभः समाधिसुखविनाशकः पापमस्ति। एतादृशः कामः भस्मसात् जायत एव। परन्तु कर्मबन्धाबद्ध–कामादेव कुमारजन्म जायते, येन लोककल्याणस्य सर्जनं भवति।

## सन्दर्भसूची


1. **न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ ।**
   **नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु।।**

   – रघुवंशम् १७।५७

2. **मेघदूत : एक अध्ययन**, राजकमल प्रकाशन, दिल्ली


*** हरप्रसाददास जैनकालेज, आरानगरस्य संस्कृत–प्राकृत–विभागपक्षतः प्रकाशितस्य 'मागधम्' इति शोधपत्रस्य दिसम्बर, १९९९ अङ्कात् सामारं गृहीतोऽयं लेखः।**

– सम्पादकः

❋ ❋ ❋

# किंचित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते ।

1. **व्यवस्था** स्वाभिधेयापेक्षावधिनियमो व्यवस्था ।
   – पूर्वापरा.......व्यवस्थायामसंज्ञायाम्, अ० १.१.३४
2. **उपसंव्यानम्** उपसंव्यानं परिधानीयमुच्यते, न प्रावरणीयम् ।
   – अन्तरं बहिर्योगोपसंव्यानयोः, अ० १.१.३६
3. **अव्ययम्** सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
   वचनेषु च सर्वेषु **यन्न व्येति तदव्ययम्** ।।
   – स्वरादिनिपातमव्ययम्, अ० १.१.३८
4. **गन्धनम्** गन्धनं सूचनम्, परेण प्रच्छाद्यमानस्य अवद्यस्य आविष्करणम् ।
   – यमो गन्धने, अ० १.२.१५
5. **उपयमनम्** उपयमनं स्वीकरणं विवाहो दारकर्म पाणिग्रहणमित्यर्थः ।
   – विभाषोपयमने, अ० १.२.१६
6. **तितिक्षा** तितिक्षा क्षमा – मृषस्तितिक्षायाम्, अ० १.२.२०
7. **सम्बुद्धिः** दूरात् संबोधयति येन वाक्येन तत् सम्बोधनं सम्बुद्धिः
   – एकश्रुति दूरात् सम्बुद्धौ, अ० १.२.३३
8. **एकश्रुति** एका श्रुतिर्यस्य तदिदम् एकश्रुति,
   एकश्रुति वाक्यं भवति ।..........
   स्वराणामुदात्तादीनाम् अविभागो
   भेदतिरोधानम् एकश्रुतिः । – अ० १.२.३३
9. **जपः** जपः अनुकरणमन्त्रः । उपांशुप्रयोगः ।
   – यज्ञकर्मण्यजपन्यूङ्खसामसु, अ० १.२.३४
10. **न्यूङ्खाः** न्यूङ्खा ओंकाराः षोडश । – अ० १.२.३४

(क्रमशः)





# कमलेशविलासः

## समीक्षकः–सुनील कुमार प्रधानः

पुस्तकस्य नाम–कमलेशविलासः, रचयिता–स्व० श्री कमलेश मिश्रः, सम्पादकः–श्री मोहनशरण मिश्रः संशोधकः–उमेशचन्द्र मिश्रः, पुस्तकस्य प्राप्तिस्थानम्–श्री चन्द्रकान्त मिश्रः, ग्रा० बासटॉड, पत्रा०–केयाल, गया (बिहारः), प्रकाशनवर्षम्–२०११ विक्रमाब्दः, पृष्ठसङ्ख्या–७८, मूल्यम्– रौप्यकद्वयम्।

गीतिकाव्यपरम्परायाम् एकमन्यतमं सोपानम् अस्त्ययं 'कमलेशविलासः'। महाकविजयदेवेन प्रभावितः कविः कमलेश मिश्रः हिन्दी–संस्कृत–पाली–आङ्ग्ल–फारसीत्यादीनां भाषाणां मर्मज्ञः प्रत्येकभाषायाञ्च कृतभूरिपरिश्रमः। तदानीन्तनपत्रिकासु (बिहारबन्धु, साहित्यसरोवर, प्रियंवदा) कवेः हिन्द्यादिकवितानां गीतानाञ्च प्रकाशनम् उक्ततथ्यम् ऊरीकरोति। 'विचारवल्लरी', 'शृङ्गारसूतिका' इति ग्रन्थद्वयम् इदं प्रमाणीकरोति, यत् काव्यशास्त्रे अपि कविरप्रतिहतगतिः आसीत्।

'कमलेशविलासः' त्रयोदशसर्गात्मकमेकं गीतिकाव्यं विद्यते। वस्तुतः रागात्मकस्य आवेशस्य सङ्गीतमयमभिव्यञ्जनं गीतेषु भवतीत्यतः कविः गीतैः सह वाद्यनृत्यादीनामावश्यकतां कदापि न विस्मरति–

**दारसभा समलङ्कृत–सर्वसुवासिनी।**
**नर्तन गायन मंगलवाद विलासिनी।।**

इह हि प्रान्तीयानां रागाणां नवीनतमः अभिनवो प्रयोगो दृश्यते। प्राचीनानां नवीनानाञ्च लयानां मञ्जुलमङ्गलयोगः सुतरां मनो हरति। विविधलयैः श्रीकृष्णचरितस्य गानमेवैतस्य गीतिकाव्यस्य प्रतिपाद्यो विषयः। अस्मिन् काव्ये गजल–होली–कज्जली–झूमर–ठुमरीत्यादिभिः लयैः नवनवतिः गीतानि तथा च शार्दूलविक्रीडित–स्रग्धरा–मालिनी–छन्दोभिः सप्तत्रिंशत् श्लोकाः सहृदयान् नितरां मोदयन्ति। अथ च सर्गशः रागस्य विविधप्रकाराः अवधातव्याः, तद्यथा–

''प्रथमसर्गे–जन्मोत्सवगीतं 'सोहर' इति, द्वितीयसर्गे गजल–'कव्वाली' नामकं वृत्तम्, तृतीयसर्गे–ठुमरी, चतुर्थसर्गे–होली, पञ्चमसर्गे–होली, षष्ठसर्गे–चैत्रमासे गेयं चैतगीतम्, सप्तमसर्गे–कज्जली,

अष्टमसर्गे–मल्लार, नवमसर्गे–दादरा, दशमसर्गे–पूर्वी–भैरवी–दादरा, एकादशसर्गे–झूमर, द्वादशसर्गे–भोजनकाले गेयं 'गाली'गीतम्, त्रयोदशसर्गे च विवाहोत्सवे गेयं 'नहछू'नामकं गीतं सहृदयचित्तान्यावर्जयति।

गीतिकाव्यमिदं साध्यद्वयं साधयति। प्रथमं कवेः सङ्गीतशास्त्र–पटुता अपरञ्च साध्यं यत् ग्राम्यगीतैः संस्कृतं लोकभाषा इति। कमलेश–विलासस्य एकादशसर्गस्य उत्तरार्द्धे लोकगीतानि एतत्पुष्टीकुर्वन्ति। केषाञ्चन गीतानाम् उल्लेखकरणस्य लोभस्य संवरणं कर्तुमहं नोत्सहे। अतः आस्वादयन्तु तावत्–

मुरारे ! मुञ्च मे दोषं वृथा वा मा कृथा रोषम्।
मृषा मा देहि मे दोषं न माजाने ! ऽहमा जाने।।
(द्वितीयसर्गः, गजलः)

अन्यच्च,
नायाति वंशीधरो मे वरो व्रजवासी प्रवासी ना।
यौऽसौ सदा निशि गेहेऽवसन्मम नग्नो मन्दके
निमग्नो मधुरमितभाषी सुहासी ना।।
(तृतीयसर्गः, ठुमरी)

किञ्च,
पिय परदेश मुचित सुवचन मा
नमसि मासेऽव सुवेषरचन मा।
(एकादशसर्गः, झूमर)

प्रसादगुणोपेतमिदं गीतिकाव्यं कविना वैदर्भीरीत्या रचयामास। शृङ्गारः अत्राङ्गी रसः अन्ये च करुणशान्तहास्याः अङ्गभूताः। कानिचन गीतानि रूपदृष्ट्या दीर्घाणि सन्ति, तत्रापि रसपेशलता मनोरञ्जकता च स्वाभाविकी एव। क्लिष्टपदानां तथा च अप्रचलितशब्दानां प्रयोगः कदाचित् रसास्वादने बाधामुपस्थापयति। क्वचित्तु भावावबोधनाय तत्सदृशसंस्कृतशब्दाः विस्मयं जनयन्ति। सन्धिसमासविषये कदाचित् क्लेश उत्पद्यते। सन्धेरभावः गायने सुलयाय एव प्रवर्तते। शब्दालङ्कारेषु अनुप्रास–श्लेषयोः प्राधान्यं पुनश्चार्थालङ्कारेषु उपमा–उत्प्रेक्षा–रूपक–काव्यलिङ्गादीनां चमत्कृतिः आग्रन्थं ध्वनति। मुद्रणदोषाः क्वचित् काव्यत्वमपकुर्वन्ति। आशासे आगामिसंस्करणे एतत् गीतिकाव्यम् इतोऽपि सहृदयाह्लादकरं भविष्यतीति शम्। ❊



# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते । वर्षारम्भः चैत्रात् (मार्च तः) मन्यते ।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियत । मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते । तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते ।
3. वार्षिकं शुल्कं त्रिंशत् (३०) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते । शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम् ।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते ।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते ।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः । रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम् ।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम् ।
8. अस्वीकृता लेखा निर्धारित 'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः ।
9. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते ।
10. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः ।
11. पत्रसम्बद्धः सर्वविधपत्रव्यवहारः धनादेशद्वारा शुल्कप्रेषणञ्च डा० गोपबन्धु मिश्रः, सम्पादकः, आरण्यकम्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (बिहारः)-802301 इति सङ्केतेन विधेयम् ।

❖